


KSUL
001525
KSUL
001525

THE

MANJULA NAISHADHA

BY

Mahamahopadhyaya Sri Paravastu Venkata Rangacharyulu Ayyavaralugaru

EDITED & PUBLISHED BY

S. P. V. RANGANADHASWAMI AYYAVRALUGARU

Grandson and Grateful Pupil of the Author

PRINTED BY A. SOORANNA

AT THE ARSHA PRESS VIZAGAPATAM

1896

SRI JAYARAJENDRA SANSKRIT COLLEGE
वाणीं भजत गैर्वाणीं
LIBRARY
FORT, BANGALORE.

नमःपरमार्षेभ्यः



मञ्जुलनैषधम्

नाम

नाटकम्

———:*:———

महामहोपाध्याय श्री परवस्तु वेंकटरंगनाथाचार्यार्यवरगुरु कृतम्

———:o:———

तत्पौत्रेण तत्पादसेवासमधिगतविद्यावैशद्येन


बेंकटरंगनाथशर्मणा

संशोध्य

स्वकीयायां वैशाखपट्टणीयाया मार्षमुद्राशालायां

सम्मुद्र्य प्रकटीकृतम्

विजयतेतराम्



शालिवाहनशकः १८१८. दुर्मुखाब्दः.

नमःपरमार्षिभ्यः ॥

मञ्जुलनैषधम्

नाम

नाटकम् ॥

MOUNT JOY,
Basavangudi,
BANGALORE CITY

—:⊙:—

यस्यैकस्य वशंवदा भगवतो मायाजगन्मोहिनो,
सर्वेषां भयदोऽपि कालभुजगो यस्याभवत्किंकरः ।
यन्नामस्मरणा दशेषकलुष प्रध्वंस माहुर्बुधाः
सश्रीमान् परमः पुमान् वितनुतां नव्यानि भव्यानि वः* ॥ १ ॥

(नान्द्यन्ते) सूत्रधारः†—(नेपथ्याभिमुख मवलोक्य)‡ आय इतस्तावत् ।

(प्रविश्य) नटो- §अज्ज इअं म्हि । को णिओओ ।

सूत्रधारः—आर्ये नानाविधदेशभाषा विशेषबन्धपरिशील

---

* ॥ यस्यैकस्येति ॥ प्रथमपादेन दमयन्तीवरणं, द्वितीयपादेन कर्कोटकव्यापारश्च सूच्यतइति मनाक्काव्यार्थसूचनम् ॥ तृतीयपादेन कर्कोटकस्य नागस्य दमन्त्यानलस्यच । ऋतुपर्णस्यराजर्षेः कीर्तनंकलिनाशनमि त्युक्त्वा त्कथानायकस्सुच्यते ॥ श्रीमान्परमः पुमान् इत्यनेन नलस्य धीरोदात्तत्वंसूच्यते ॥

† नान्दींप्रयुज्यपूर्वसूत्रधारोविनिर्गतोद्वितीयःस्थापकनामाप्राविश्यउत्तरवाक्यंवदतीत्यर्थः ॥ नान्दीपूर्वोक्तश्लोकः । पदादीनयमरहितोचंयनान्दी । तथाचलक्षणम् । पदादिनियमो ऽपिवा इति । प्रयुज्यन्तेचबहुषुप्राचांनाटकेषुनान्द्यःपदनियमरहिताः ॥

‡ नेपथ्यंनामरङ्गस्थलव्यातिरिक्तंयवनिकान्तरितंनटवर्गस्थानम् ॥

§ आर्य इय मस्मि । कोनियोगः ।

नपरिपक्वहृदयेयं परिषत् । अभिरूपरूपकप्रयोगमन्तरेण नसमाराधनीयेति चिन्तयामि ॥

नटी—*अज्ज अत्थि जेव्व बहओ पबन्धा । किं चिंताए कारणम् ।

सूत्रधारः—आर्येश्रूयतां रहस्यत् ।

ये कालिदासभवभूतिमुखप्रबन्धाः †
प्रायेण ते परिषदाखलु दृष्टपूर्वाः ।
प्राचीनमार्गगलना दधुनातनानां
संलक्ष्यते कृतिषु वाचि विचित्रतैव ॥ २ ॥

नटी—‡अज्ज एत्थवि किंकारणं ।

सूत्रधारः—शृणु ।

कालेन प्रबलेषु राजसु महीभारावतारार्थिना
देवेन स्वयमुद्धृते ष्वपगते ष्वस्त्रादि शास्त्रेषूच ।
आक्रान्ता मृतसिंहकन्दरगता व्याधैर्यथा शाबका
वर्बऽस्मिन्नधुनातना नृपतयो द्वीपान्तरीयै ¶ र्जनैः ॥ ३ ॥

नटी—§ तदो किं ।

---

* आर्य सन्त्येव बहवः प्रबन्धाः । किं चिन्तायाः कारणम् ॥ अत्थि स्त्यादिना इति प्रथमपुरुष बहुवचनेनसह अस्तेः अत्थिइत्यादेशः ॥ बहओ, पुंसोजासिडउड ओवाइतिबहुशब्दाज्जसः डित् अओ इत्यादेशः । डित्वाट्टिलोपः ॥

† कालिदास भवभूतिमुखानां प्रबन्धाः । तत्कर्तृकप्रबन्धाइत्यर्थः ॥

‡ आर्य अत्रापि किं कारणम् ।

¶ गहादित्वाच्छः । आंग्लैरित्यर्थः ।

‡ ततःकिम्

सूत्रधारः—ततश्चास्मदीयेषु राजसु तद्देशभाषावर्शंवदेषु प्रायेण सर्वेषि स्वभाषापरिशीलनं परित्यज्य तद्भाषा मे वा धीयते। अस्तिहि। यथाराजा तथाप्रजाः। इति।

नटी—तदो तदो*।

सूत्रधारः—एतस्मिन्नपिकाले केचि दनूचानसंप्रदाय परित्याग भीरवः स्वभाषा मपरित्यजन्तः स्वोदरभरणायास गलित बहुकालाः कश्चि त्काल मधीयते ग्रन्थान्; तेनच प्राचीनमार्ग मजानानाः पामरजनमात्रसन्तोषणेन स्वोदरपोषणाय शब्दाडम्बरमयीं कविता मादृत्य सञ्चरन्ति। इदानींतन प्रभुजन संसर्गिणी त्वियंपरिषदनुकूलदैवसंपादितविविधविद्यावैशद्यै स्तैरेव निर्मितासु पाठशाला स्वधी त्यास्मदीयाने वाधुनातनान्विदुषः परिहसति। कथं पुनरेषां प्रबन्धानाद्रियेतेति चिन्तावशगो ऽस्मि।

नटी—†किंणुक्खु जो कोवि लद्धवण्णो णत्थि। जो ताणं अपरिहसणिज्जो।

सूत्रधारः—आः स्मृतम्। अस्तिखल्वधुनापि परिशीलितसंस्कृत प्राकृत नानाविधदेशभाषा वैज्ञानिको द्वीपान्तरीय विद्वज्जन विनिर्मित शास्त्र काव्य सारज्ञो ऽस्मदीयप्राचीनमहाकविमार्ग निष्णातो नानातन्त्र स्वतन्त्रः श्रीपरवस्तु पदाङ्कित भारद्वा

---

* ततस्ततः

† किं नु खलु यःकोऽपि लब्धवर्णोनास्ति। यस्तेषा मपरिहसनीयः। लब्धो वर्णः प्रशस्तिर्येन। खुइतिविस्मयेप्राकृतनिपातः। तस्य खलु इतिच्छायाकाव्यन्यासमयानुसारिणी॥

जान्वय भट्टन,वगुरुकुल तिलकस्य श्रीनिवासगुरो स्तनयो वि कटोरियाचक्रवर्तिनो प्रसादलब्ध महामहोपाध्याय विरुदाङ्कः वेंकटरङ्गनाथनामा महाकविः ॥

नटो—*साहु सुमरिअं अज्जेण। सो हि कइ असाधारणो त्ति सुणीयदि।

सूत्रधारः—तेनहिकौतुका द्विरचितंमञ्जुलनैषधंनाम नाटक म् ॥ तदभिनयेन परिषदिय माराधयितुं शक्यते। तदिदानीं तमेव वसन्तऋतु मुद्दिश्य सङ्गीतक मङ्गीक्रियताम्।

नटो—†तह (इतिगायति)

‡णिअपल्लव रससंगह तोसिअ कोइल विरावसारण्णो।
उज्जाणे सहआरो सोरह मोइअ दिअंतरो लसइ ॥ ४ ॥

सूत्र—आर्ये साधुगीतम्। यदनेन वृत्तान्तेन एतस्य कथानायकस्य महाराजनैषधस्य निजसरससूक्तिसंतोषित मंत्रिवर्गस्य य

---

* साधुस्मृत मार्येण। सहिकविरसाधारणइतिश्रूयते ॥ स्मृधात्वादेशात् सुमर इत्ये तस्मात् क्तेसुमरिअंइति ॥

† तथा ॥ वा ऽव्ययोत्खातादावदातइतिआदेरातःअकारागमः ॥

‡ पात्रप्रवेशंसूचयति ॥ णिअइति ॥ निजपल्लवरससंग्रहतोषितकोकिलविरावसारज्ञः। उद्यानेसहकारःसौरभमोदितदिगन्तरोलसति ॥ सारण्णो। म्नज्ञोर्णः इति ज्ञस्यणः। आदेशद्वित्वम् ॥ सोरह। औतओत् इति औकारस्यओकारः। खघथधभा मिति भस्यहः ॥

ग्रःप्रकाश विशदीकृत दिगन्तरालस्य सभायां स्थितिर्विडम्ब्यते* ।
तदेहयावामप्यनन्तरकरणीयाय सज्जीभवावः । (इतिनिष्क्रान्तौ) ॥

प्रस्तावना† ॥

(ततःप्रविशतियथा निर्दिष्टो राजामन्त्रिणश्च) ॥

राजा— (मन्त्रिणोविलोक्य) यदुक्तं भवद्भिः कीर्तिर्नामाद्भु
त मसुलभंचफलमिति । तत्तथैव । तथाहि ।

जगतिंहिपुरुषार्थाः प्राणिभिः प्रार्थ्यमाना
निजयतनमहिम्ना सन्निधिं यान्ति दूरात् ।
यशइहमतिमद्भिर्वाञ्छितं सञ्चितंच
व्रजति दिनविशेषै र्दूर मिष्टं तथाऽपि ॥ ५ ॥

तदेतस्य सम्पादने सावधानैर्भवद्भि र्भवितव्यम् ॥

मन्त्रिणः—महाराज भवतः प्रभावएव अस्माक मवधान मा
चरति । तत्रके वयम् ।

संवर्धिते जगति धर्मतरौ त्वयैव
च्छाया मुपेत्य मनुजाः परिपूर्णकामाः ।
हन्तस्मरन्तिनकथंचि दधर्मशब्द
मासो द्यथार्थक ममात्यपदंपरंनः ॥ ६ ॥

(प्रविश्य) दौवारिकः— जयतु जयतु देवः । क मपि साप

---

* अनुक्रियते इत्यर्थः । सूच्यते इतिपाठान्तरम् ।

† सूत्रधारो नटींब्रूतेमार्षवाऽथविदूषकम् । स्वकार्यप्रस्तुताक्षेपि चित्रोक्त्याय त्तदामुखम् । प्रस्तावना वा इतिदशरूपम् ।

रार्घं पु रुषमानीय नागरिक स्यालो द्वार मध्यास्ते ।

राजा— आः प्रकृतविरोधी कोयमर्थः । भवतु शीघ्र मानी यताम् ।

(निष्क्रान्तो दौवारिकः)

(ततःप्रविशतिस्यालः पुरुषश्च)

स्यालः—* जेदु जेदु महाराओ । सो अयं इमस्सिं णिसा वसाणेकिंवि राउलकण्णयालंछणं सचेडिअं कण्णआरअणं आणीय अम्हकेरपुरम्मि संचरइ । ता महन्तो गूढचोरो त्ति संसयाणे ण मए गहिओं ॥

राजा—कुल सा कन्यका ॥

स्यालः—† ताए रक्खणे पुरिसे णियुज्ज देवस्स आणत्तिं पडिवालेदुं आगओ म्हि ॥

राजा—आनोयतां सा ऽपि ।

नहि संशयमात्रेण दण्डनोयोभवेज्जनः ।

बलवल्लिङ्गमादाय कर्तव्यो ऽर्थस्यनिश्चयः ॥ ७ ॥

यतः ।

अदण्डना दण्ड्यजनस्यराज्ञा

---

* जयतु जयतु महाराजः । सोऽय मस्मि निशावसानेकिमपि राजकुलकन्य कालाञ्छनं सचेटीकं कन्यारत्नमानीया स्मदीयपुरे सञ्चरति । तन्महान् गू ढचोरइति संशयानेन मयागृहीतः ॥

† तस्या (= राजकुलकन्यारत्नस्य) रक्षणे पुरुषा नियोज्य देवस्याज्ञाप्तिं प्रति पालयितुम् आगतोऽ स्मि ॥

मदण्ड्यदण्डो बलवान्हिदोषः ।
य स्त्यक्तदण्डस्सयमेनदण्ड्यः
स्वयंतुदण्डादनघस्यराजा ॥ ८ ॥

तदानीयतां चेटयासह कन्यका । ततः पश्यामोव्यवहारम् । कस्को ऽत्रभोः ॥

(प्रविश्य)दौवारिकः—*किं ओणावेइ देवो ॥

राजा—अनीयतां पुरुषाभिरक्षिता सचेटीका कन्यका ।

दौवारिकः—§तह । (इतिनिष्क्रम्य चेटयाकन्यकयासहप्रविष्टः) ।

राजा—(कन्यां दृष्ट्वा, साश्चर्यं स्वगतम्)

किमिय मसरकन्या लोचने नार्निमेषे
किमु मनुजकुमारी नेदृशं वस्तु लोके ।
सृजतिमदनमेषा साकथं सृष्टि रस्य
स्वयमिदमतिलोकंरूपमत्राविरासीत् ॥ ९ ॥

(प्रकाशं पुरुषं प्रति) कोनुभवान् । काचेयं कन्यका ।

पुरुषः—अहंविदर्भदेशवासीजनः । मम चेयंपुत्रिका ॥

राजा—(साश्चर्यं, मन्त्रिणः पश्यति)

मन्त्रिणः—महाराज नेदं विसृम्भणीयं वचनम् ।

राजा—भवतु तावत् । वचनान्तरैः प्रष्टव्यो ऽयं जनः । (पुरु

---

* किं माज्ञापयति देवः ।

§ तथा ।

पंप्रति) अयिनेदं सुसङ्गतार्थं वचनम् ।

अस्या रूपं लोकमेवातिशेते
त्वं नामर्त्यः कन्यकैषाकथंते
यद्वा चोरः स्वेनसम्पाद्यतेयत्
तत्तत्सर्वं मन्यतेस्वीयमेव ॥ १० ॥

पुरुषः--- महाराज नात्रार्हं प्रष्टव्यः ।

प्रष्टव्योऽत्र विधातैव सहिर्मानिरवग्रहः ।
विरूपपुत्रिकाजन्म कारणं सम्कल्पयत् ॥ ११ ॥

अथवा यदिपुनरविश्वासो ममवाचि, त त्पृच्छ्यता मेषैव कथयिष्य तिसर्वम् ।

राजा— (कन्यामुद्दिश्य)

अयि भद्रेभवत्तातो दत्तवा नेवमुत्तरम् ।
त्वयैव खलु कर्तव्या वय मुच्छिन्नसंशयाः ॥ १२ ॥

कन्यका— (तूष्णों भूतातिष्ठति)

राजा— (मन्त्रिण उद्दिश्य) ननु निरुत्तर मेवोत्तरं मन्यते त त्रभवती । कथमत्र संशयोच्छेदः ।

मन्त्रिणः— किञ्चि दत्रास्त्यवशेषम् । यच्चे टिकाप्रश्नः ।

राजा— युक्तमुक्तं भवद्भिः ।

व्रीडानिरुद्धवचसां कुलकामिनीनां
विन्दु र्ननिस्स्रवतिमङ्क्षुवचो मृतस्य ।
तस्या गृहीतवचनामृतविन्दु वृन्दा

तच्चेटिका सुखयतु श्रवणद्वयं नः ॥ १३ ॥

(चेटीं मुद्दिश्य) अयि चेटि। का तत्रभवती। किंभूत श्चास्या स्सोऽयंपुरुषः।

चेटी— §महाराअ णाहं जाणे। अहं उण वेसवाडिआइ वट्टमाणा चेडिआ। अणेणच वेअणं दाहं ति कण्णअत्थे अहं अइणिआ॥

राजा—(विहस्य) संप्रत्यसंशयं जातं व्यवहारपदम्। (विचिन्त्य)। को ऽत्र निर्णयोपायः। भवतु तावत्। एवं करिष्यामः। कस्कोत्र भोः।

(प्रविश्य) दौवारिकः —*महाराअ अयं म्हि।

राजा— आनीयता मन्तःपुरपरिजने ष्वन्यतमः।

दौवारिकः— †तह (इति निष्क्रम्य अन्तःपुरचेट्या वसुन्धरयासह प्रविशति॥

दौवारिकः—†महाराअ एसा अंबंतिअचारिणी वसुंधराणाम देआचेडी।

---

§ महाराज नाहं जाने। अहं पुन र्वैशवाटिकायां वर्तमाना चेटिका। अनेनच वेतनं दास्यामीति कन्यकार्थे ऽह मानीता। अइणिआशब्दो देशी॥

* महाराज अय मस्मि।

† तथा।

‡ महाराज एषा अम्वान्तिकचारिणी वसुन्धरानामधेया चेटी। अंवान्तिकचारिणीत्यनेन नलस्यैकपत्नीत्वं व्यज्यते॥

राजा—अयि वसुन्धरे! एषा देशान्तरा दागता कन्यका नास्माक मुत्तरं ददाति व्रीडया। त देनां सह चेटिकया ऽन्तःपुरं नीत्वा सानुनय मेतस्याः समाचारः प्रष्टव्यः।

वसुन्धरा—§ तह (इति गृहीतकन्यकाहस्तया चेट्या सह निष्क्रम्य पुनः प्रविशति)।

वसुन्धरा—‡ महाराअ! अच्छरिअं अच्छरिअं। सैसा पडिमा सव्वावयवसोहणे णोवलद्धा।

राजा—(साश्चर्यम्)। आः किमेतत्।

सर्वे—(परस्परं सवैलक्ष्यं पश्यन्ति)।

राजा—(पुरुष मुद्दिश्य) भोः! कथय सत्यम्।

पुरुषः—महाराज! सत्य मस्मि शिल्पकारः।

राजा—त त्कथ मेतावन्नोक्तम्।

पुरुषः—महाराज!क्षम्यताम्। मम शिल्पचातुरी महाराजस्य प्रस्फुटा भवे दिति।

राजा—(विहस्य) स्यालक! वन्ध्यमनोरथो ऽसि चोरग्रहण पारितोषिकालाभात्। गच्छ नायं चोरः॥

स्यालः—*जं आणावेइ देवो। (इति निष्क्रान्तः)॥

राजा—(शिल्पिनमुद्दिश्य) भोः शिल्पिन्।

---

§ तथा।

‡ महाराज आश्चर्य माश्चर्यम्। सैषा प्रतिमा सर्वावयवशोधने नोपलब्धा।

* यदाज्ञापयति देवः॥

सर्वाङ्गसुन्दर मिदं रूपं मनसैव कल्पितं तव किम् ।
आहोस्वि दस्ति कन्या सापि प्रतिकृति रियं यस्याः ॥ १४ ॥

शिल्पी—महाराज! सेयं विदर्भराजकन्यकाया दमयन्त्याः प्रतिकृतिः । अहंच तत्पुरवासी । कदाचि न्महाराजभोमसकाशे तस्याः प्रतिकृतिं चित्रे लिखितां दृष्ट्वा इमां प्रतिमां निर्मितवा नस्मि । एतादृशविद्यापरिश्रमस्यच फलदाता भवा निति जगति वितर्तं भवद्यशः शृत्वा भवन्निकट मानीता । ममायं वृत्तान्तः । इतःपरं महाराज एव प्रमाणं कर्तव्येषु ॥

राजा—कस्कोत्र भोः ॥

(प्रविश्य) दौवारिकः—†जेदु जेदु महाराओ ॥

राजा—दौवारिक! भाण्डागारिकं प्रति मम वचनेन ब्रूहि । एषशिल्पी पूर्णपात्रेण§ संभावनीयइति । एतच्च विनोदस्थानं कन्यकाप्रतिबिंबं प्रमदवनोद्यानमण्डपे निवेश्यता मितिच ॥

दौवारिकः—§तह (इति शिल्पिना चेट्या प्रतिमयोच सह निष्क्रान्तः) ॥

राजा— (स्वगतम्) हन्त सा दमयन्तो कथं स्यात् ॥

* प्रतिकृति रियं यस्या स्सा भोमराजतनूभवा,

---

† जयतु जयतु महाराजः ।

§ 'उत्सवेषुसुहृद्भिर्य द्वलादाकृष्यगृह्यते । वस्त्रमाल्यादि तत्पूर्णपात्रं पूर्णानकंच तत्' इति वैजयन्ती ।

§ तथा ।

* उपक्षेपो नाममुखसन्ध्यङ्गम् ।

न खलु सुलभा यस्मा दूरे दृशो र्वचसा मिव ।
†† स पुन रवनीनाथो याच्ञां म मार्हति,
सा पुनर्मनसि कुरुते कं वा जाने कथं खलु त त्पुनः ॥१५॥

अथवा किमेतै र्मनोरथैः ।

अन्यादृशं रूप मतीव तस्या, मन्यामहे तस्यच नोपमानम् ।
अन्येजनाःकौतुकमात्रमेषा,धन्योऽधरंपास्यतिकश्चिदस्याः ॥

§ यद्यस्ति तादृशं पुण्यमास्माकीनं पुरातनम् ।
लोकोत्तर गुणा मेनां धातैव घटयिष्यति ॥ १७ ॥

‡तथापि प्रतिकृतिदर्शनाकृष्टचित्तो ऽहं न शक्नोमि ता मन्तरेण मनो निवर्तयितुम् । हन्त को ऽत्र विनोदनोपायः ॥

(प्रविश्य) दौवारिकः— *जेदु जेदु महाराओ । देवस्स उज्जाणवालो पहरिससमुप्फुल्ललोअणो पिअं णिवेदिदुकामो दुवारम्मि चिट्ठइ ॥

राजा— प्रवेश्यताम् ।

दौवारिकः— †तह (इति निष्क्रान्तः) ॥

(ततः प्रविशत्युद्यानपालः)

उद्यानपालः— जयतु जयतु देवः ॥

---

†† परिकरो नाममुखसन्ध्यङ्गम् ।
§ युक्तिर्नाममुखमन्ध्यङ्गम् ।
‡ परिन्यासो नाममुखसन्ध्यङ्गम् ।
* जयतु जयतु महाराजः । देव स्योद्यानपालः प्रहर्षसमुत्फुल्ललोचनो प्रियं [निवेदयितुकामो द्वारि तिष्ठति ।
† तथा ।

राजा—अयि वृक्षायुर्वेदाध्यापक कथम्भूत मस्मत्प्रियतम मुद्या नम् ॥

उद्यानपालः—महाराज! किं मिति वर्णया म्युद्यानम्। येन विकत्थनत्वभोति मम स्यात्। तथापि कथयामि भूतार्थम् ॥

काले फलानि कुसुमानि लताश्च वृक्षाः
सन्दर्शयन्तियदिकिं वनपाल शिल्पम्।
स्वाभाविकान् यदिगुणान् प्रथयन्ति वा चे
त्कालस्वभावगतपाटव मेव मान्यम् ॥ १८ ॥

राजा—किं नु खलु नानाविधानि दोहदानि सज्जोकृतानि वैचित्र्यनिमित्तानि च ॥

उद्यानपालः—अथ किम्। इदानों पुन रभिनववसन्तल क्ष्मो विहारसंपादितरामणोयकं वाचामगोचर मुद्यानम् ॥ तथाहि।

अशोकै रामूलं कुसुमकलिकापल्लवयुतैः
स्फुरत्पुष्पोदग्रस्तबकयुतवल्लोवलयितैः।
विडंब्यन्ते कान्ताजननिबिडसंश्लिष्टतनवो
नवोन्मेषाः कम्राः परिकलितकौसुम्भवसनाः ॥ १९ ॥

अपिच।

सद्योजातरसालकोरकदलग्रासप्रमोदालसा,
उच्चैः पञ्चमराग माश्रितनगाः कूजन्ति पुंस्कोकिलाः।
नानासूनसमुन्मिषन्मधुरसास्वादेन मत्ता भृशं,
गायन्तो विचरन्ति वन्दिन इव प्रत्यास्पदं षट्पदाः ॥ २० ॥

अपिच ।

मलयपवनसूत्रधारशिक्षा
बलसलयोच्चलितप्रवालहस्ता ।
विलसति नवमालिकालताङ्गो
कृतविविधाभिनया स्वयं नटोव ॥ २१ ॥

राजा—तेन हि प्रवृत्त इव वनलक्ष्मोवसन्तयोःपरिणयोत्सवः

उद्यानपालः —अत एव हि देवस्य सन्दर्शनसभाजन मभ्यर्थं यतो वनलक्ष्मो र्वसन्तश्च ॥

राजा—(स्वगतम्) अयं चैव माह । अह मपि दमयन्तोप्रतिकृतिदर्शनोत्कण्ठ मात्मानं विनोदयितु मुपायान्तरं न पश्यामि । (प्रकाशम्) उद्यानपाल साधय त्वम् । वय मप्यद्यै वोद्यानदर्शना यागमिष्यामः ॥

उद्यानपालः-- य दाज्ञापयति देवः (इति निष्क्रान्तः) ॥

राजा— कस्कोत्र भोः ॥

(प्रविश्य) दौवारिकः—* जेदु देवो ॥

राजा—दौवारिकउद्यानदर्शनाय गच्छाम स्त दौपवाह्य स्तुरग स्सज्जोक्रियता मिति मन्दुरापालाय निवेदय ॥

दौवारिकः—†जं आणावेइ महाराओ । (इति निष्क्रान्तः) ॥

(नेपथ्ये) वैतालिकः—

सुचरितकृतच्छायाधूताखिलव्यसनातपं

---

* जयतु देवः ।

† य दाज्ञापयति महाराजः ।

जगति विततं विष्व ग्देवस्य य द्विमलं यशः ।
त दिद मधुना धत्ते मध्यंनभःस्थितभास्करं
कनककलशारूढस्फायत्पटोगृहविभ्रमम् ॥ २२ ॥

राजा— (आकर्ण्य) माध्याह्निकक्रिया सन्निधत्ते ऽस्माकं। ता मनुसर्तुं प्रमदवनतटाक मेव गच्छामः ॥

(इति निष्क्रान्ताः सर्वे)

इति श्रीमन्मञ्जुलनैषधे महानाटके प्रथमोऽङ्कः ॥

———— :*: ————

॥ अथद्वितीयोंकः ॥

॥ प्रवेशकः ॥

(ततः प्रविशति सुप्तोत्थितो विदूषकः)

विदूषकः ॥ (उन्मील्य चक्षुषोप्रमृज्य) अहो मम अविवेओ उ अरंभरित्तणं च। मज्झण्हे एव्व अंतेउरजणेहिं रण्णो पिअवअं सोत्ति सबहुमाणं अप्पिआइं मोअअखंडाइं कंठदग्घं भक्खिअ णि पोऊणच फलरसे पाणअरसंच एतस्सिं पमदवणपेरंतअलिंदम्मि एव्व गवक्खाअददाहिणमारुदपरिक्खाए विअ सइदो कज्जंतराणि विम्हरिअ सुइदोम्हि। उवट्ठिदो अ पदोसो। (स्मरणमभिनोय)। साअण्हे जेव्व तुए सण्णिहिदेण होदव्वंति वअंसेण णियुत्तो म्हि। अण्णं च परादिदं दाणिं। हिओ क्खु विअब्भराअद्दिदाए जंतप्पडिमं सिप्पिहदएण केणवि आणीदं पेक्खिअ तदो पहुदि पज्जूसुअस्स मणसो विणोदणस्स एदं पमदवणुज्जा

णं पेक्खिदुं आअदो वअंसो । तत्थ कंचणपक्खो कोवि रा अहंसो आगमिअ विअब्भराअधूआए ताए एव्व दमयं तीए रूवगुणे पसंसिअ वअंसेण तं पुरं पेसिदो । तत्थ वअंसरूव गुणे पसंसिअ इदो पुव्वं एव्व ताए महंतो अणुराओ अत्थि त्ति मु णिअ पुणोवि एत्थ आगमिअ ताए वुत्तंतं सव्वं कहिदवंतो । ता सुणिअ विउणमणोरहो ताए पच्चक्खदंसणोवाअं चिंतेहि त्ति मं पुणो पुणो णिब्बंधेदि । अहं किं करेमि । कहंणु देसंतरट्ठिदं तं ए त्थ आणयामि । एणं वाकहं ताए समीवं णयामि । सव्वहा राअसे वा अणद्धाणुबंधिणि त्ति तक्केमि । का गई । (विचिन्त्य) भोदु परि हासादिहिं तेहिं तेहिं उवायेहिं विम्हारअंतो कहं वि कालं खिवा मि । ता दाणिं एव्व वअंसं दट्ठुं तं एव्व पमदवणुज्जाणमंडवं गच्छा मि* ॥ (इति निष्क्रान्तः) ॥

॥ प्रवेशकः ॥

---

* अहो मम अविवेक उदरंभरित्वं च । मध्याह्न एवान्तःपुरजनैः राज्ञः प्रि यवयस्य इति सबहुमानार्पितानि मोदकखण्डानि कण्ठदघ्नं भक्षा यित्वा निपीत्वाच फ लरसानि पानकरसंच एतस्मि न्प्रमदवनपर्यन्तालिन्द एव गवाक्षागतदक्षिणमारुत परीक्षाया इव शयितः कार्यान्तराणि विस्मृत्य सुप्तो स्मि । उपस्थितश्च प्रदोषः । सायाह्न एव त्वया सन्निहितेन भवितव्य मिति वयस्ये न नियुक्तोऽस्मि । अन्यच्च परापतित मिदानीम् । ह्यः खलु विदर्भराजदुहिताया: यन्त्रप्रतिमां शिा ल्पिहतकेन केनाप्यानीतां प्रेक्ष्य, ततः प्रभृति पर्युत्सुकस्य मनसो विनोदनाय एतं प्रमदवनोद्य नं प्रेक्षितु मागतो वयस्यः । तत्र काञ्चनपक्षः कोऽपि राजहंस आगत्य । विदर्भराज दुहितायास्तस्या एव दमयन्त्याः रूपगुणान् प्रशस्य इतः पूर्व मेव तस्या महान नु रागोऽस्तीति ज्ञात्वा पुन रप्य त्रागत्य तस्या वृत्तान्तं सर्वं कथितवान् । त च्छ्रुत्वा

(ततः प्रविशति कामयमानावस्थो राजा) ॥

राजा—

क्वा विदर्भाः क्व च मामकं पुरं
विलासिनीं दूरगता मवै म्यहम् ।
तथापि सास्मिन् क्षण एव सर्वथा
विलोकनोयेति मनः प्रधावति ॥ २३ ॥

अहो विधे रघटितघटनापटो रयं प्रभावः ।

न दृष्ट्वा नस्मि नितम्बिनों तां
तथापि रूपं न परोक्ष मासोत् ।
त देत दन्तश्च बहि श्चकास्ति
य दन्तिके नास्ति विचित्र मेतत् ॥ २४ ॥

हन्त तत्प्रतिकृतिदर्शना दार भ्यास्वस्थचित्तो ऽहम् । लब्धावसर श्चायं मदनहतकः प्रहरति । (आकाशेलक्ष्यं बध्वा)। भो दुरात्मन् ।

तव किल कुसुमानि पञ्च बाणा
मदन तथा प्यतिनिष्ठुरः प्रहारः ।
स च खलु विषयो न लोचनाना
मतनु रसि त्व मिदं कथं प्रवृत्तम् ॥ २५ ॥

द्विगुणमनोरथः तस्याः प्रत्यक्षदर्शनोपायं चिंत येति मां पुनःपुनो निर्बन्धयति । अ हं किं करोमि। कथं नु देशान्तरास्थित म त्रानयामि। एनं वा कथं तस्या स्समीपं नया मि । सर्वथाराजसेवा अनर्थानुबंधिनीति तर्कयामि । का गतिः । भवतु परिहासादि भिस्तै स्तै रुपायैर्विस्मारयन् कथ मपि कालं क्षिपामि । त दिदानी मेव वयस्यं द्रष्टुं प्रमदवनोद्यानमण्डपंगच्छामि ॥

(निरूप्य)हन्त लोकापकारपरायणस्य ते भगवतो पुरारिणा निर्वृति तो विनाशोऽप्य स्मादृशा मपकारायैव कल्पते ॥ तथाहि ।

अधाक्षी स्त्वां देव स्त्रिजगदपकारैकनिपुणं
प्रसन्न स्त्वत्पत्न्यां स पुन रजिजीव त्सकरुणः ।
भव त्वेत त्कस्मा त्पुन रतनुता मेष कृतवा
नदृश्यो येन त्वं प्रहरसि च लोकान शरणान् ॥ २६ ॥

हन्त दुरात्मना ऽनेन परिभूयमान मात्मानं त्रातु मशक्तोऽस्मि । किं करवाणि । सखा च मे चिरयति ॥

(ततः प्रविशति विदूषकः) ॥

विदूषकः—*अज्ज ज्जेव्व क्खु वअंसो माहवीलदामंडवम्मि चिट्ठदि त्ति सुदं उज्जाणपालमुहादो । ता दाणिं तत्थ एव्व गच्छामि । (इति परिक्रम्य । अग्रतो दृष्ट्वा)एसो क्खु साणुल्लोढो मणो विअ किसत्तं गदो वि तेजोमेत्ताणुमेअमाहप्पो दीसइ पिअवअंसो । ता णं उवसप्पामि ॥ (उपसृत्य) जेदु पिअवअंसो ॥

राजा—अये वयस्यः । सखे उपविश्यताम् ।

विदूषकः—(उपविश्य)*किंणु भो सव्वं कज्जं उज्झिअ इह ज्जेव्व एआई उम्मत्तो विअ किंवि चिंतयन्तो ट्ठिदो भवम् । णि

---

* अद्यैव खलु वयस्यो माधवीलतामण्डपे तिष्ठतीति श्रुत मुद्यानपालमुखात् । तदिदानीं तत्रैव गच्छामि । एष खलु शाणोल्लीढोम णी वकृशत्वं गतोऽपि तेजोमात्रा नुमेयमाहात्म्यो दृश्यते प्रियवयस्यः । तदेनंउपसर्पामि ॥ जयतु प्रियवयस्यः ॥

* किं नु भोः सर्वं कार्यं उज्झित्वा इहैवैकाकी उन्मत्त इव किमपि चिन्तयन् स्थितो भवान् । निगृह्ण मनः ॥

गेण्ह मणं ॥

राजा—सखे किं करोमि ।

चेतो वशीकार्यं मिति प्रसह्य
यदा यदा यत्न महं करोमि ।
तदा तदा न्त र्मम कामबाणो
यन्त्रा दि वोद्गच्छति मर्मघातो ॥ २७ ॥

त दहं न जानामि निग्रहोपाय मेतस्य त त्त्व मेव चिन्तय ॥

विदूषकः— * चिंतेमि भो खणं चिट्ठ । (इति चक्षु र्नि मील्य ध्यानं नाटयति । पुन श्चक्षु रुन्मील्य) भो वअंस कहं वि तु ह हिअअं मह दंसेहि । तं रज्जुहिं दिढं णिबंधावेमि । तदो अंतग्ग दो मअणहदओ वि दिढं णिबंधो भवे । तदो जहिट्ठं कादुं सक्को यदि ॥

राजा—(विहस्य) वयस्य सम्य क्चिन्तित उपायः ।

दक्ष स्त्वं भवसि वयस्य सर्वकार्ये
धर्तुं वा प्रभवसि मस्तकेन शैलम् ।
त त्रैकः पर मभिलप्यते सहायो
यो नीत्वा कथ मपि मूर्ध्नि ते निदध्यात् ॥ २८ ॥

त दल मेतादृशै रुपायैः । सखे कथ मुत्कण्ठाविसंस्थुल मात्मानं वि

* चिन्तयामि भोः । क्षणं तिष्ठ । भो वयस्य कथ मपि तव हृदयं मम दर्शय । त द्रज्जुभि र्दृढं निबंधयामि । ततो ऽन्तर्गेता मदनहतको पि दृढं निबद्धो भवेत् । ततो यथेष्टं कर्तुं शक्यते ॥

नोदयामि ॥

विदूषकः—(स्मृतिमभिनीय)। †वअंस चिट्ठ दाणिं। साहु उवाओ चिंतिदो। आणेमि दाव महाणसं गदुअ समीचीणाइ भक्खाइं। ताणि तुमं मए सह जाव खाअसि दाव ण काविचिंता भविस्सदि ॥

राजा—अलं भोः परिहासेन। सत्यमेव चिन्तय विनोदनोपायम्।

विदूषकः—§वअंस किं अण्णेहिं विणोदणोवायेहिं। अत्थि एव्व जंतप्पडिमा। त पादप्पहुदि केसंतं पेक्खंतो विणोदेहि अप्पाणं ॥

राजा—सत्यं विनोदनोपाय एव सः। मम त्विदानीं मनर्थपर्यवसायि तद्दर्शनम्। तथाहि।

आदौ विलोभयति चक्षुरियं ममैव
चेतो मुनेरिव विरञ्जयति क्रमेण।
कान्तेव तत्त्वविद एष परं विशेषः
तन्वीस्मृतिं विदधती व्यथयत्यतीव ॥ २९ ॥

---

† वयस्य तिष्ठेदानीम्। सा धूपाय श्रान्तितः। आनयामि तावन्महानसं गत्वासमीचीनानि भक्ष्याणि। तानि त्वं मया सह यावत्खादसि तावन्नकापि चिंता भविष्यति ॥

§ वयस्यकिं अन्यैः विनोदनोपायैः। अस्त्येव यन्त्र प्रतिमा। तां पादप्रभृति केशान्तं प्रेक्षन् विनोद यात्मानम्।

त दुपायान्तरं ब्रूहि ॥

विदूषकः— ‡जइ एव्वं ता देवदापसादं अंतरेण ण एदं स क्कं। जं दाणिं एव्व एत्थ एव्व तत्तहोदो दमयंतो सयं एव्व सच्चं एव्व तुह पुरो आविब्भवदि त्ति। णं पुच्छामि। जइ दाणिं एत्थ एव्व सा आविब्भवदि ता किं करेसि ॥

राजा—(निःश्वस्य) कुतो स्माकं तादृशं भागधेयम् ॥

(नेपथ्ये) *सहि इदो हदो ॥

राजा—(कर्णं दत्त्वा) किं नु खलु भो अदूरे ऽस्माक मस्मि न्ने वोद्याने स्त्रीसल्लाप इव श्रूयते ॥

विदूषकः—(कर्णं दत्त्वा) §एव्वं णेदं ॥

(ततः प्रविशति दमयन्ती केशिनी च)

केशिनी— *सहि दमअंति अणु अदं आअच्छंतिं मं वि उ ज्झिअ मणम्मि एव्व किं वि आळवंती णिअम्बभरखिण्णचलणा पदे पदे स्खलन्ती गच्छसि। ता चिट्ठ। मं ओलंबेहि करेण ॥

---

‡ य येवं त देवताप्रसाद मन्तरेणनेत च्छक्यम्। य दिदानी मेवा त्रैव त वभवती दमयन्ती स्वयमेव सत्यमेव तव पुर आविर्भव तीति। ननु पृच्छामि। यदिदानी मत्रैव सा आविर्भवति त त्किं करोषि ॥

* सखि इत इतः ॥

§ एव मेतत् ॥

* सखि दमयन्ति अनुपदं आगच्छन्तीं मा मपित्यक्त्वा मनस्येव किमपि आ लपन्ती नितम्बभरखिन्नचरणा पदे पदे स्खलन्ती गच्छसि। त तिष्ठ। मा मव लम्बस्वकरेण ॥

नोदयामि ॥

विदूषकः—(स्मृतिमभिनीय)। †वअंस चिट्ठ दाणिं। साहु उवाओ चिंतिदो। आणेमि दाव महाणसं गदुअ समीचीणाइ भक्खाइं। ताणि तुमं मए सह जाव खाअसि दाव ण काविचिंता भविस्सदि ॥

राजा—अलं भोः परिहासेन। सत्यमेव चिन्तय विनोदनोपायम्।

विदूषकः—§वअंस किं अण्णेहिं विणोदणोवायेहिं। अत्थि एव्व जंतप्पडिमा। त पादप्पहुदि केसंतं पेक्खंतो विणोदेहि अप्पाणं ॥

राजा—सत्यं विनोदनोपाय एव सः। मम त्विदानीं मनोर्थपर्यवसायि तद्दर्शनम्। तथाहि।

आदौ विलोभयति चक्षुरियं ममैव
चेतो मुनेरिव विरञ्जयति क्रमेण।
कान्तेव तत्त्वविद एष परं विशेषः
तन्वीस्मृतिं विदधती व्यथयत्यतीव ॥ १९ ॥

---

† वयस्य तिष्ठेदानीम्। सा धूपाय श्रान्तितः। आनयामि तावन्महानसं गत्वासमीचीनानि भक्ष्याणि। तानि त्वं मया सह यावत्खादसि तावन्नकापि चिंता भविष्यति ॥

§ वयस्यकिं अन्यैः विनोदनोपायैः। अस्त्येव यन्त्र प्रतिमा। तां पादप्रभृति केशान्तं प्रेक्षन् विनोद यात्मानम्।

त दुपायान्तरं ब्रूहि ॥

विदूषकः— ‡जइ एव्वं ता देवदापसादं अंतरेण ण एदं स क्कं। जं दाणिं एव्व एत्थ एव्व तत्तहोदो दमयंतो सयं एव्व सच्चं एव्व तुह पुरो आविब्भवदि त्ति। णं पुच्छामि। जइ दाणिं एत्थ एव्व सा आविब्भवदि ता किं करेसि ॥

राजा—(निःश्वस्य) कुत्रा स्माकं तादृशं भागधेयम् ॥

(नेपथ्ये) *सहि इदो हदो ॥

राजा—(कर्णं दत्त्वा) किं नु खलु भो अदूरे ऽस्माक मस्मि न्नो द्याने स्त्रीसल्लाप इव श्रूयते ॥

विदूषकः—(कर्णं दत्त्वा) §एव्वं णेदं ॥

(ततः प्रविशति दमयन्ती केशिनी च)

केशिनी— *सहि दमअंति अणु अदं आअच्छंतिं मं वि उ ज्झिअ मणम्मि एव्व किं वि आलवंती णिअम्बभरखिण्णचलणा पदे पदे खलन्ती गच्छसि। ता चिट्ठ। मं ओलंबेहि करेण ॥

---

‡ य येवं त देवताप्रसाद मन्तरेणनैत च्छक्यम्। य दिदानी मेवा त्रैव त वभवती दमयन्ती स्वयमेव सत्यमेव तव पुर आविर्भव तीति। ननु पृच्छामि। यदिदानी मत्रैव सा आविर्भवति त त्किं करोषि ॥

* सखि इत इतः ॥

§ एव मेतत् ॥

* सखि दमयन्ति अनुपदं आगच्छन्तीं मा मपित्यक्त्वा मनस्येव किमपि आ लपन्ती नितम्बभरखिन्नचरणा पदे पदे स्खलन्ती गच्छसि। त त्तिष्ठ। मा मव लम्बस्वकरेण ॥

राजा— (पुरो ऽवलोक्य। साश्चर्यम्) कथं सा तत्रभवतो विदर्भराजनन्दना सखीसहिता इत ए वाभिवर्तते। कथ मिदं संवृत्तम् ॥

किं मेष स्वप्नः स्या त्किमु मतिविकृत्या विलसितं
किं मय्यन्तध्याना त्प्रचित मिव रूपं मम पुरः।
किं माख्यानै रेतन्मदनहतकस्य प्रभवतः
प्रसिद्धं पाण्डित्यं यदिह दयिता वर्तत इव ॥ ३० ॥

विदूषकः—(सम्यङ्निरूप्य) †वअंस सच्चं एव्व लदागुम्मव्ववहिदा कावि तत्तहोदी सहीए सह आलवन्ती मए वि दीसइ। ताकिं मह वि सिविणो वा चित्तविब्भमो वा भवे ॥

राजा—सत्यं तवा प्येवमेव भासते ॥

विदूषकः—§सच्चं सवामि भो बम्हसुत्तेण ॥

राजा— यदि तवा प्येवं नायं स्वप्नो मतिविभ्रमो वा। पश्य।

स्वप्ने ऽपि जागरितव त्प्रतिभाति विश्वं
नैवानुभूतिरपि तं विशिनष्टि किञ्चित्।
संवादमात्र मिह जागरिते परेषां
स्वप्नेतु नेति दशयो रनयो र्विवेकः ॥ ३१ ॥

---

† वयस्य सत्यमेव लतागुल्मव्यवहिताप्यपि तत्रभवती सख्यासह आलपन्ती मयापि दृश्यते। तत्किं ममापि स्वप्नोवा चित्तविभ्रमोवा भवेत् ॥

§ सत्यं शपामि भो ब्रह्मसूत्रेण ॥

तेन हि । चित्र मे वैतत् ।

तथा ऽपि दैवे नानोते संप्राप्ते चक्षुषोः फले ।
किमर्थां हेतुजिज्ञासा सर्वं नास्मादृशो विदुः ॥ ३२ ॥

त दत्रस्थिता वेवा वा मनयो विस्रंभालापं श्रोष्यावः ॥

दमयंतो—(स्थित्वा सखो मवलम्बते । सखीं प्रति) ‡सहि किंणु क्खु सो राअहंसो मह संदेसं सुट्ठु तस्स राएसिणो णिवेदेदि । णिवेदिदं वा तं सो राएसी अणुमण्णदि ॥

राजा—अनुमन्येत माम् ॥

केशिनो—*अयि अणप्पण्णे । को णु उण अयत्तलद्धं रअणं ओजाणादि ॥

राजा—सत्यमाह सखो । अयि मुग्धे ।

दृष्ट्वा पि भोरु तदिदं मुकुलेषु रूपं
लोकोत्तरं तव न किं नु विदा श्चकर्थ ॥ ३२ ॥ ॥

आः परिज्ञातम् ।

मुग्धासि हन्त मुकुरस्थितभाज मन्यां
कन्यां समर्थयसि ते न बिभेषि नूनम् ॥ ३३ ॥

दमयन्तो—* सहि कदं णु रत्तिम्मि तिण्हा एदे किरणा

---

‡ सखि किं नु खलु सराजहंसो ममसन्देशं सुष्ठु तस्यराजर्षेः निवेदयति । निवेदितं वा तं सराजार्षिं रनुन्यमते ॥

* अयि अनात्मज्ञे । को नु पुनः अयत्नलब्धं रत्नं अवजानाति ॥

* सखि कथं ननु रात्र्यां तीक्ष्णा इतेकिरणा मां बाधन्ते । तत्किं सूर्य उदितः ॥

मंबाधन्ति । ता किं सुज्जो उदिदो ॥

केशिनी—†सहि रत्तिम्मि पुढमे जामे कहं सुज्जो उदेदि । हं त उम्मत्ता सि तुमं ॥

राजा—नेयमुन्मत्ता । सख्ये वोन्मत्ता ॥ तथाहि ।

निशि निशि दव दहनशिखासंपृक्तइ वास्मि यत्करैः क्रूरैः ।
स कथं नु भवे दिन्दु र्नियत मुदेत्यर्क एव पुन रेवम् ॥ ३४ ॥

विदूषकः—(विहस्य) ‡वअंस जइ सच्चं सुज्जो रत्तिम्मि रत्तिम्मि उदेदि । ता किं ति सव्वे जणा चंदो त्ति ववदिसन्ति । तेण हि सव्वे एव्व एदे उम्मत्ता एव्वे त्ति तक्केमि । ता उम्मत्ता णं एदाणं मज्झआरम्मि चिट्ठन्तो अहं हदोम्हि ॥

दमयन्ती—§ सहि विचिन्तेहि तस्स राएसिणो दंसणो वायं ॥

केशिनी—* सहि कहं दाणिं दंसणोओ सो राएसी ॥

राजा—हन्त अत्रैवस्थितं मां नजानात्येषा । तदद्यैवावसरो दर्शयितु मात्मानम् ॥

---

† सखि रात्र्यां प्रथमे यामे कथं सूर्य उदेति । हन्तोन्मत्तासि त्वम् ॥

‡ वयस्य यदि सत्यं सूर्यो रात्र्यां रात्र्यं उदेति । तत्किमिति सर्वे जनाः चन्द्र इति व्यपदिशन्ति । तेनहि सर्वे एव एते उन्मत्ता एवेति तर्कयामि । तदुन्मत्तानामेतेषां मध्ये तिष्ठन् अहं हतोऽस्मि ॥ मज्झआर शब्दो देशी ॥

§ सखि विचिन्तय तस्य राजर्षे र्दर्शनोपायः ॥

* सखि कथमिदानीं दर्शनीयस्य राजर्षेः ॥

विदूषकः-- †वअंस अतिचवलदाए मा एदाणं वीसंभालावं दूसेहि ॥

राजा—सत्य मुक्तं भवता ।

परितप्यते मदवलोकना दृते
दयितेति दर्शयितु मुत्सुको ऽस्म्यहम् ।
श्रवणामृतानि वचनानि लज्जया
विरतानि हन्त ननु तापयन्ति माम् ॥ ३९ ॥

तदाकर्णनोया न्याकर्णयावः ॥

दमयन्तो—*सहि किं एत्थ करणिज्जं ॥

केशिनो— (स्मरण मभिनोय) ‡सहि महाराअसण्णिहिम्मि चित्तकारेण आणीदाणि विहिदराएसिअणि णाणाचित्तफलआणि । ताणि महाराएण अंतेउरं पडिप्पेसिदाणि । तेसु एदस्स राएसिणोचित्तफलअं गेण्हिअ अहं आअदा तुह विणोदणस्स जेव्व । अहं तुह वअणहिं विम्हरिअ ट्ठिदा । ता एदं पेक्खदु भवदी । (इतिचित्रफलकमर्पयति) ॥

---

† वय स्यातिचपलतया मै तेषां विस्रम्भालापं दूषय ॥

* सखि कि मत्र करणीयम् ॥

‡ सखि महाराजसन्निधौ चित्रकारेण आनीतानि विहितराजार्षिकानि नानाचित्रफलकानि । तानि महाराजेन अंतःपुरं प्रति पेषितानि । ते श्वेतस्य राजर्षेः चित्रफलकं गृहीत्वा अह मागता तव विनोदनायैव । अहं तव वचनै र्विस्मृत्यास्थिता । त देत त्प्रेक्षतु भवती ॥

दमयन्ती—(दृष्ट्वा। सविस्मयम्) §सहि एसो राएसो अदिकंदो एव्व रूवेण वम्महं। का कहा माणुसाणं। ता राअहंसेण जो जो गुणो जह जह णिरूविदो सो सव्वो तह तह एव्व जहत्थो। णत्थि एत्थ संदेहो॥

केशिनी—*को एत्थ संदेहो॥

दमयन्ती—†सहि किं अहं से अणुरूवा ण वेत्ति भआउल म्हि॥

केशिनी—(विहस्य) *सहि एदं एव्व राएसिं पुच्छ। अहं दे अणुरूवा णवेत्ति॥

राजा—किं नुख ल्वतःपरं कुर्या त्प्रियतमा॥

दमयन्ती—(सलज्जं) †सहि णाहं पारेमि लज्जाए पुच्छिदुं। तुमं एव्व मम्मुहेण विण्णावेहि॥

केशिनी—(चित्रफलकस्थं राजानं मुद्दिश्य) ‡भो महाराअ मह सही मम्मुहेण विण्णावेदि। अहं तुह अणुरूवा णवेत्ति॥

राजा—एवमस्माभि रेव प्रियतमाप्रष्टव्या। वय मनुरूपा न

---

§ सखि एष राजार्षि रतिक्रान्त एव रूपेण मन्मथम्। का कथा मानुषाणाम्। तद्राजहंसेन यो यो गुणो यथा यथा निरूपितः स सर्व स्तथा तथैव यथार्थः। ना स्त्यत्र संदेहः॥

* को ऽत्र सन्देहः॥

† सखि कि मह मस्यानुरूपा नवेति भयाकुलास्मि॥

* सखि एत मेव राजार्षिं पृच्छ। अहं ते अनुरूपा नवेति॥

† सखि ना हं पारयामि लज्जया प्रष्टुम्। त्व मेव मन्मुखेन विज्ञापय॥

‡ भो महाराज मम सखी मन्मुखेन विज्ञापयति। अहं तवानुरूपा नवेति॥

वेति।

दमयन्ती—(स वैलक्ष्यं, सेर्ष्यंच) §सहि राएसो ण किंवि उत्तरं पडिवज्जइ। अणुत्तरेण अणणुमदो सूचीभदि ॥

राजा—हन्त नृशंस एवा स्मि। इतः पर मपि कथ मुदासो नो भविष्यामि। त दद्यैवा त्मानं दर्शयिष्यामि।(इति सहसोत्थाय)

यथा मां शङ्कसे भीरु
न कदापि तदा स्म्यहम्।
तव प्रसाद मिच्छामि
पादाब्जाभ्यां च ते शपे ॥ ३६ ॥

विदूषकः—(विहस्य। राजानं हस्ते गृहीत्वा)‡वअंस इंदजालं एदं। ण पुरो दे वामक्खो ॥

राजा—सखे त्व मुन्मत्तो ऽसि।
समक्षदृष्टा मपि ता मपह्नुषे
कथं नु मिथ्येति वदे रिमां पुरः।
य दीत्थ मप्यत्र मृषेति शङ्कसे
तदा कुत स्त्वं न मृषा भविष्यसि ॥ ३७ ॥

विदूषकः— §वअंस सच्चं इंदजालं। जइ ण वीससिसि ता

§ सखि राजार्षिः नकि मप्युत्तरं प्रतिपद्यते। अनुत्तरे णा ननुमति स्सू च्यते ॥
‡ वयस्य इंद्रजाल मेतत्। न पुरो ते वामाक्षी ॥
§ वयस्य सत्य मिंद्रजालम्। यदि न विश्वसिसि तत्प्रतिहारिणं पृच्छ। को ऽपीन्द्रजालिक स्सन्निहितो नवेति ॥

पडिहारिं पुच्छ । कोवि इंदजालिओ सण्णिहिदो णवे त्ति ॥

राजा—कस्कोत्रभोः ॥

(प्रविश्य) प्रतोहारो—*जेदु जेदु देवो । को णिओओ ॥

राजा—किमस्ति कश्चि द्द्वारदेशे ऐन्द्रजालिकः ॥

प्रतोहारी—†अह इं । देवस्स दंसणकामी दारम्मि चिट्ठइ ॥

राजा—आनयैनम् ॥

प्रतोहरी— ‡तह (इतिनिष्क्रान्तः । पुनः प्रविशति ऐन्द्र जालिकश्च)

ऐन्द्रजालिकः—

§सिट्ठिं पोम्मभवस्स लंघिअ णवं सिट्ठिं करिस्सं अहं
णट्ठं वत्थु णयामि हंत पुरदो दिट्ठंच दूरे तह ।
दिट्ठिं सव्वजणस्स वंचिअ परं पावेमि अट्ठौ दिसा
कट्ठं हंत तहा वि कुच्छि भरदो पुट्ठो जणो मग्गइ ॥ ३८

(राजानं पुरो ऽवलोक्य)‡हंत सव्वब्भुअकारिणो वि मह विम्हआ

---

* जयतु जयतु देवः । को नियोगः ॥

† अथ किं । देवस्य दर्शनकामी द्वारि तिष्ठति ॥

‡ तथा ॥

§ सृष्टिं पद्मभवस्य लङ्घयित्वानवं सृष्टिं करिष्याम्यहम्
नष्टं वस्तु नयामि हंत पुरतो दृष्टंच दूरे तव ।
दृष्टिं सर्वजनस्य वंचयित्वा परंप्रापयाम्यष्टौदिशः
कष्टं हंत तथापि कुक्षिभरात् पुष्टो जनोमृग्यते ॥

‡ हन्त सर्वाद्भुतकारिणो ऽपि मम विस्मयावहं रूप मादधानो महाराज स्तिष्ठति । त देनं उपसर्पामि ॥

वट्टं रूव माअहाणो महाराओ चिट्ठइ । ता णं उवसप्पामि ॥

प्रतोहारी—§जेदु महाराओ ॥

विदूषकः—*भो इंदजलिअ उपसंहर तुह विज्जं । जं वयं सो ण मह वअणं वीससदि ॥

ऐन्द्रजालिकः—(उपसंहरति । अन्तर्हिता ससखीका दमयन्ती)

राजा—(निःश्वस्य) हन्त मायैषा संवृत्ता । (ऐन्द्रजालिकमुद्दिश्य । सक्रोधम्) हन्तैव मस्मान् प्रतारितवा नसि ॥

ऐन्द्रजालिकः—§महाराअ णेदं पदारणं ॥

राजा— तर्हि किम् ॥

ऐन्द्रजालिकः— ‡महाराअविणोदणस्स विदूषएण पेरिदोम्हि ॥

राजा— मिथ्यारूपदर्शनं कथं प्रतारणं न भवितु मर्हति ॥

ऐन्द्रजालिकः—*महाराअ ण एदं परमत्थदो मिच्छा । एण्हिं कुंडिणउरे वट्टमाणं इहच्चं व विज्जा प्पहावेण सच्चविअं ॥

रजा— ननु सत्यमिदम् ॥

---

§ जयतु महाराजः ॥

* भो इंद्रजालिक उपसंहर तव विद्याम् । य द्वयस्यो न मम वचनं विश्वसिति ॥

§ महाराज नेदं प्रतारणं ॥

‡ महाराजविनोदनाय विदूषकेन प्रेरितो ऽस्मि ॥

* महाराज नैत त्परमार्थतो मिथ्या । इदानीं कुण्डिनपुरे वर्तमानं इहत्य मिव विद्याप्रभावेण दर्शितम् ॥ एण्हि, सच्चविअं शब्दौदेश्यौ ॥ ॥ उद्भेदो नाम मुखसन्ध्यङ्गम् ॥

ऐन्द्रजालिकः— §पच्चयत्थं अण्णत्थ दीसमाणं एत्ताहे चेअ अण्णत्थ दावेमि। जइ रोअइ ॥

राजा— कृतं वाचैव। तर्हि प्रियतरो ऽसि नः ॥

§अदृश्यमानं तद्रूपं दर्शयित्वा मनोहरम्।
य न्मा मतूतुषस्तस्मा त्पारितोषिक मस्त्विदम् ॥ ३९ ॥

(इति हस्ता त्कटक मवमुच्यार्पयति ॥

ऐन्द्रजालिकः—‡कअत्थो म्हि ॥

राजा—साधय भद्र मस्तु भवते ॥

ऐन्द्रजोलिकः—§तह (इतिनिष्क्रान्तः) ॥

राजा—सखे।

प्रतिवागलाभपरितापसम्भ्रम
प्रणयप्रकोपकृतचित्तविभ्रमम्।
वदनारविंद मरुणं नतभ्रु वः
स्फुरतोति हन्त पुरतो ऽधुनापि मे ॥ ४० ॥

त दिदानों पारितोषिकं निर्वर्तयितु मन्तःपुर मेव गच्छामः ॥

(इति निष्क्रान्ताः सर्वे) ॥

इति श्रीमन्मञ्जुलनैषधे महानाटके द्वितीयोऽङ्कः ॥

---

§ प्रत्ययार्थं मन्यत्र दृश्यमानं इदानमिव अन्यत्र दर्शयामि। यदि रोचते ॥ एत्ताहे, चेअ, दावेमि शब्दा देश्याः ॥

§ समाधानंनाम नुखसन्ध्यंगम् ॥

‡ कृतार्थो ऽस्मि ॥

§ तथा ॥

॥ अथ तृतीयोंकः ॥

॥ शुद्धविष्कम्भः ॥

(ततः प्रविशति नारदपर्वतौ)

नारदः—

सत्यं ज्ञान मनन्त मेक मचलं त द्ब्रह्म तत्त्वं परं
ज्योति र्निर्मल मामनन्ति मुनयो यस्मा त्समस्तं जगत् ।
जातं जीवति येन यत्र विलयं यात्यन्तकाले पुन
स्तल्लीलाविशदानुभूतिमहिमा प्रोल्लासयत्य ेष नः ॥ ४१ ॥
नंदन्ति केचि दपरे करुणं रुदन्ति
केचि त्स्वपन्ति बतजाग्रति जन्तवो ऽन्ये ।
स्वप्नानुभूति निरताः कतिचि द्भ्रमन्ति
लीलो त देत दखिलं परमस्य पुंसः ॥ ४२ ॥

पर्वतः—भगवन्ननु पृच्छामि । नतावत्परमः पुमान् करुणाम यः सर्वसमइतिखल्वामनन्ति मुनयः । त त्कथं कांश्चन नन्दयति कां श्चन रोदयति ॥

नारदः—वत्स मामैवं । शृणु तावत् ।

मायायस्य विचित्रशक्तिविविधाकारांशभेदाकुला
नानाभूत विशेषभूषित मिदं विश्वं विधत्ते पृथक् ।
त स्यैवांशतया स्फुरन्ति विमला वह्नेःस्फुलिङ्गा इव
क्षेत्रज्ञा स्तदुपाधिसङ्गविवशा भ्राम्यन्ति रज्यन्तिच ॥

साक्षी स नन्दति पुमान् परमः पुराणो
विश्वस्य हेतु रपि न प्रतिभेदहेतुः ।
रागादिमूलसुखदुःखनिमित्तकर्म
तद्वासनासु न कथं च न तस्य लेपः ॥ ४४ ॥

एवंविधसुखदुःखवैचित्र्यानुभूतिमात्रं तस्यलोलारसव्यपदेशं भजति ॥

पर्वतः—यदि पुन रेवम् । परदुःखानुभूति रपि करुणाकरस्य कथं लोलारसत्वं भजति ॥

नारदः—अवधेहि तावत् ।

आत्मास्वयं सुखमयः सहजेन दुःखं
मोहैककल्पित मिदं नखलु स्थिरं तत् ।
बालस्य रोदन मि वानियतं कथंनु
सर्वस्य वेदितु रिदं कथयाव भाति ॥ ४५ ॥

अपिच ।

आत्मानन्दः स्फुरति सहजो प्या त्मनांनेह लोके
मायाग्रन्थिक्षुभित मनसां सो ऽपवर्गैक गम्यः ।
दुःखाभासप्रशमन मिदं यातिमध्ये सुखत्वं
दुःखाभावे कथमिव सुखं भासतां भाव यान्तः ॥ ४६ ॥

पर्वतः—भगवन् सुविदित मिदानीम् ॥

नारदः—अत एव चाहं कलहप्रियो ऽस्मि । अपि कथं कलहरहितेप्यस्मिन्काले कलहोपाय उपक्षिप्तः । तथाहि ।

भूपा भीमसुतास्वयंवरविधौ रूपावलेपान्विता
याताः कुण्डिनमन्तरेण तु नलं तस्या न भावो ऽन्यतः ।
जय्यो नैष परस्य तत्र कलहायन्तां कथं मानुषा
स्तस्मा दिन्द्रयमाश्रयाशवरुणा देवा मया प्रेरिताः ॥ ४७ ॥

पर्वतः—त त्कथ मेते निमन्त्रणानपेक्षा ब्रह्मबन्धव इव भोज नवेलायां निर्लज्जा दमयन्ती स्वयंवरवेलाया मुपस्थास्यन्ति ॥

नारदः—अत एव हि महान् विनोदो ऽस्माकम् ॥

पर्वतः— एत त्सर्वं भगवतो मन्त्रप्रभावबोजप्ररोह एवेति तर्कयामि ॥

नारदः—तत्र कस्सन्देहः । अन्यच्च । तस्या मेवविदर्भराजन न्दनायां आत्मनिदत्तहृदयायां आसक्तहृदयं नैषधमेवैते स्वार्थे दूत्य मर्थयिष्यन्ते ॥

पर्वतः— धि ग्जाल्मान् । त स्यै वैते स्वयं परिहासपात्राणि भविष्यन्तीति मन्ये ॥

नारदः—तर्हि प्रियमेव नः । परंतु स राजर्षि र्धार्मिकतया देवभक्ततया चान्तः क्षुभितो ऽपि नतेषां याच्ञां विहन्ति ॥

पर्वतः—तर्हि तस्याएव दमयन्त्यास्तादृशा भविष्यन्ति ॥

नारदः—उभयथा ऽपि प्रियं नः ॥

पर्वतः—कलहैकप्रियस्य भगवतो नेदं पर्याप्त मिति मन्ये ॥

नारदः—अत एव होदानीं क्रमेण पुरन्दरादिवल्लभानां द्धांतान्प्रतिप्रयातुकामो स्मि ॥

पर्वतः—कस्य हेतोः ॥

नारदः—तेषां पराङ्गनाप्रवृत्तिं निवेदयितुम् ॥

पर्वतः—महान् खल्वयं विनोदो ऽस्माकम्। तथाहि।

दिव्या स्ते धरणीं प्रयान्ति नृवधू लाभाशया निस्त्रपा
नाकं वन्ध्यमनोरथा नतमुखाः प्रत्यागमिष्यन्तिचेत्।
तेषा मेव गृहप्रवेशसमये कान्तासखीभिः कृतं
हस्ताङ्गुल्यवभञ्जनादि सरवं कस्मैनरोचेतभो‡ ॥ ४८ ॥

नारदः—त देहि। प्रथमं पुरुहूतवल्लभान्तःपुरमेवगच्छा वः ॥

(इतिनिष्क्रान्तौ)

॥ शुद्धकिष्कम्भः ॥

(ततः प्रविशति राजा)

राजा—

* देवानां परितोषणोय विहितं शंसन्ति धर्मं बुधा
यस्तस्य प्रतिकूलता मुपगत स्त्याज्यस्स कामार्थयोः।
एवं देवमनोरथ प्रणयिनों कान्तां परित्यज्य तां
निर्लेपं भव चित्त नाधरसुधा माहर्तुं महांवयन् ॥ ४९ ॥

(विचिन्त्य। सविषादम्) कथ मिद मत्याहितं समापतितम्। किम त्रकरणोयम्। (विभाव्य)। मन्ये देवाना मपि वचन मधर्म्य मतिल

---

‡ 'नरोचिष्यते' इति पाठान्तरम्।

* विलापाख्यं प्रतिमुखाङ्गम् ॥

ङ्नोय मेवेति । (साशङ्कम्) । मामैवम् ।

यो द्रुह्य त्यमराधिपाय सकिल स्वर्गस्य दूरो भवेत्,

(सविमर्शम्) । अस्तु ।

स्वर्गे किं दयिता समागमसुखा ल्लभ्येत लाभो ऽधिकः ।

(सातङ्कम्) ।

देवः कुप्यति चेदमुत्र न परं नास्तो हकिं चित्सुखम्,

(सौत्सुक्यमम्) ।

§पीत्वा तां वर मंगनाधरसुधां मृत्यु र्मुधा जोवनात् ॥ ५० ॥

(पुनस्सनिर्वेदम्) । हन्त तादृशानांभागधेयन्नां अभाजन मात्मान म वलम्ब्य किमिति शोच्यते । (पुनः सस्मरणम्) । आःकिमिदं स्वा र्थैकपरत्वंदेवोनाम् ॥

येना र्थिताभूदरविन्दनेत्रा साचार्थयामासपुरैवयंमां ।

सोऽहं तदोप्सारभसेन दूत्येदेवैर्नियुक्तोऽस्म्यथवानियत्या ॥

(विमृश्य) ।

हंसेन सर्वं मुदितं किं मलोकमेव,

(साशङ्कम्)

किं वञ्चितेन ननु तस्य मया फलं स्यत् ।

(आज्ञातम्) ।

दैवेन दुःख मनुभावयितुं मयैत

त्सर्वं व्यधा य्य पि कथं नृवदाह पत्रो ॥ ५२ ॥

§ परिसर्पास्यं प्रतिमुखाङ्गम् ॥

(पुनर्निरूप्य) मा मैवम् ॥

यद्वाचा म पि मादृशस्य मनसोयद्वाविदूरे स्थितं
तत्त द्वस्तु वदन्ति दिव्यमिति तदेवा स्सदाभुञ्जते ।
एवं सत्यपि किन्नु मर्तचरमणी संश्लेष वाञ्छाभवे
त्तन्मे धर्म परीक्षणाय विहितं सर्वं तदेत द्भवेत् ॥ ५३ ॥

(पुनस्सातङ्कम्) हन्त मूढो ऽस्मि ।

तदितरदुरवाप स्वोपमानैकरूपा
मविदुर इव जान न्नेवकान्तां शुभान्ताम् ।
कि मलपिष मिदानीं हन्तसोहं समोहं
किमुखलु मुरलके काचिदेवं विधास्यात् ॥ ५४ ॥

अस्तु यथाकथंचि दपि नलङ्घनीयो देवादेशः । यतः ।

आराधनं हि देवाना मारदपि फलप्रदम् ।
किं न दातुं समर्था स्ते किं वा जन्मैक मेव नः ॥ ५५ ॥

तेन हीदानीं देवदूत एव संवृत्तः । तदत्तातिरस्करणीप्रभावेन सर्वै रदृश्यएव कुण्डिनपुरं गच्छामि । (इति परिक्रामित नाटितकेन पु रो ऽवलोक्य) अयेरमणीय मेत न्नगरं कुण्डिनं विदर्भराजस्य ॥

सौधा मेघवितानरूपविकृति भ्रान्ति प्रदाग्रलया
रथ्या स्सन्तत संचरद्रथपथप्रोद्भूतकोलाहलाः ।
दृश्यन्ते विपणीषु पौरवणिजां विस्तरि तान्यङ्गणे
रत्नस्रङ्मुखभूषणानि विशिखावेषाथं भूषाइव ॥ ५६ ॥

तदे तस्य नगरस्यराजगृहंगच्छामि। (इतिपरिक्रम्य । पुरोऽवलोक्य)

एषा द्वारपरम्परा समवयोवेषाढ्यदौवारिका
यातायातजनप्रचारबहुला सत्य प्यकोलाहला ।
विष्वग्दारुनिबद्धयो रभिमुखं भाति क्वचि च्चिष्ठतो
र्बिम्बाना मिव सन्तति र्मुकुरयो स्संलक्ष्यमध्यस्थयोः ॥५७

तदने नैवद्वारे णाऽदृश्योन्तः पुरमार्गेण गच्छामि । (इति परिक्रम्य) । त देत त्कन्यान्तःपुरम् । यतः ।

इत स्संदृश्यन्ते परमधिकृताः कर्मसु वधूजन
स्तासां कश्चिद्वश मिव गता यान्ति विनयात् ।
इतश्च स्थापत्याः कनकमयवेत्रोज्ज्वलकरा
दिशन्तो निश्शब्दं निभृतमिति वाचः पूतिपदम् ॥ ५८ ॥

त दत्रैव तत्रभवती स्यात् । (परिक्रम्य । पुरतोऽवलोक्य) अयोसेयं तत्र भवती ।

उत्थाय किं चि च्छतपत्रतल्पा
त्सखीकरालम्बित बाहुवल्ली ।
निश्श्वाससंसूचित विक्लबत्वा
सैषा सखीभ्या मिह दृश्यते ऽग्रे ॥ ५९ ॥

भव त्वेव मन्तर्हितएव तावत् क्षण मासां विस्रंभालापं श्रोष्यामि ॥

(ततः प्रविशति सह सखीभ्यां दमयन्ती)

सख्योरेका—*हळा दमयन्ति मए णिम्मिअं एदं अम्बुरुहत

* हला दमयन्ति मया निर्मित मेत दम्बुरुहतल्पं तव सुखाय भवति ॥ तल्ल शब्दो देशी ॥

लं तुह सुहस्स होइ ॥

दमयन्ती—†सहि इदो परमो णोवआरो ॥

अन्या—§सहि अम्हे कअं सव्वं उवआरमेत्तं व पडिभाइ ।

दमयन्ती—‡अह इं ॥

अन्या—§सहि किं एत्थ कादव्वं । वद तुमं जेव्व ॥

दमयन्ती—‡सहि किं करोमि । तुम्हेहिं अप्पडिविहेयस्स वसणस्स भागहेयं म्हि ॥

अन्या—‡सहि तस्स राएसिणो दंसण मंतरेण अण्णं उ वायं ण पेच्छामि ॥

राजा—को ऽनु भवे त्सराजर्षिः ॥

सामन्यशब्दश्रवणेन ताव
न्मा चित्त गर्वं समुपैहि सद्यः ।
लोके विशाले कति वा नसन्ति
राजर्षिशब्दै रभिधोयमानाः ॥ ६० ॥

सखी—§सहि दमयन्ति जइ दाणिं एत्थ एव्व सो राएसी

† सखि इतः परमो नोपचारः ॥

§ सख्यावाभ्यां कृतं सर्व मुपचारमात्र मिव प्रतिभाति ॥

‡ अथ किम् ॥

§ सखि कि मत्र कर्तव्यम् । वद त्व मेव ॥

‡ सखि किं करोमि । युवाभ्या मप्रतिविधेयस्य व्यसनस्य भागधेय मस्मि ॥

‡ सखि तस्य राजर्षेः दर्शन मन्तरेण अन्यमुपायंन पश्यामि ॥

§ सखि दमयन्ति य दीदानीं अत्रैव स राजार्षे राविर्भवति । त किं करोषि

आविब्भवदि । ता किं करेसि ॥

दमयन्तो—(लज्जावनत मुखोतिष्ठति) ॥

राजा—ओः कि मेतैः स्वावस्था बिस्मरणनिमित्तै र्व्यापा रैः । अयमे वावसरो दर्शयितु मात्मानम् । (इति तिरस्करिणी मपनी याग्रे तिष्ठति) ॥

(सहसखीभ्यां दमयन्ती विलोक्य । सर्वाउत्थाय सविस्मयं पश्यन्ति)

राजो—कुशलं भवत्यौ ॥

सख्यौ—§साअदं महाराअस्स ॥

दमयन्तो—(अपवार्य) †सहि सो अअं नेसहो राएसो ॥

सख्यौ—‡अह इं ॥

दमयन्तो—†ण विस्ससिमि । तारिसस्स भोअद्देअस्स भाअ णं अप्पाणं ॥

प्रथमा—(सपरिहासम्) ‡सहि विस्ससिस्ससि । (प्रकाशम् । राजानंप्रति) मम्मुद्देण सही विण्णावेदि । महारएण खणं उवबे साणुग्गहो करणिज्जो ॥

---

§ स्वागतं महाराजस्य ॥

† सखि सोऽयं नैषधो राजर्षिः ॥ प्रशमाख्यं प्रतिमुखाङ्गम् ॥

‡ अथ किम् ॥

† न विश्वसिमि तादृशस्य भागधेयस्य भाजन मात्मानम् ॥

‡ सखि विश्वसिष्यसि । मन्मुखेन सखी विज्ञापयति । महाराजेन क्षण मुपेव क्षनुग्रहः करणीयः ॥

राजा—युष्माभि रपि ।

सर्वे—(उपविशन्ति)

दमयन्ती—§सहि कुदो आगदो अयं दाणिं राएसी ॥

सखी—‡महाराअ सही विण्णावेइ । कुदो आगमणं केण वा सक्कारेण अम्हे धण्णा कादुं ॥

राजा—

जानीथ देव ममराधिपतिं बलारिं
विश्रूयते नु पवनस्य सखा हुताशः ।
अस्त्येव दण्डधर इत्यपि किंवदन्ती
पाशी समुद्रभवनोधिपतिः प्रसिद्धः ॥ ६१ ॥

सख्यौ—*जाणिमो ओणिमेसभोअरलोअणे देवाधिवई ॥

राजा—

तै र्नियुक्तो स्मि वां सख्या वरणे त्रिदशेश्वरैः ।
तेषा मकारण स्सोयं भवत्सख्या मनुग्रहः ॥ ६२ ॥

सख्यौ—†हला दमयन्ति तुए नेसहो वुदो । दिप्पालेहिं पि भअवन्तेहिं अणुमदं ॥

---

§ सखिकुत आगतो ऽयं इदानीं राजार्षिः ॥

‡ महाराज सखी विज्ञापयति । कुत आगमनं केनवासत्कारेण अस्मन् धन्याः कर्तुं ॥

* जानीमो निर्निमेष भीकरसोचनान् देवाधिपतीन् ॥ निष्प्रतीत्यादिना ओं कारादेशः ॥

† हला दमयन्ति त्वयानैषधो वृतः । दिक्पालै रपि भगवद्भिः अनुमतम् ।

राजा—(स्वगतम्)। हन्ताान्यार्थक मासां जातं मम वचन म्। (सवैक्लव्यम्) क्व मादृशां तादृशानि भागधेयानि। (प्रकाशम्) भ वत्यो मा मैवम् ॥

तेषां सुराणा मह मस्मि दूतो
वृण्वन्ति चैनां युवयो स्सखीं ते।
उक्तेषु यो ऽत्राभिमत स्स वर्यो
न मन्वते तत्र परं ऽपराधम्॥ ६३ ॥

सख्यौ—‡सहि दमयन्ति एव माह महाणुभावो। को एसा मण्णदमो तुह वरणिज्जो ॥

दमयन्तो—(अपवार्य) †सहि किं मां लज्जेसि। किं णआणासि म माहिलासो।

सख्यौ—§महराअ किं बहुणा। एआणं पंचाणं पुढमं अंतरेण अम्हो सहो ण परं दट्ठुं पि उच्छहइ ॥

रजा—(स्वगतम्) धि गद्यापि मा मेव मन्दभाग्यं वरोतु मुत्सहते मन्दभाग्या। भवत्वे वं ब्रवीमि ॥ (प्रकाशम्)।

तै रेव देवतानाथै र्वृते यंयुवयो स्सखो।
एनां परिगृहोतां तैः कथं हर्तुं मलं नरः ॥ ६४ ॥

‡ सखि दमयन्ति एव माह महानुभावः। क एषा मन्यतम स्तव वरणीयः ॥

† सखि किं मां लज्जयसि। किं नजानासि ममाभिलाषः ॥

§ महाराज किं बहुना। एतेषां पंचानां प्रथम मन्तरेणा वयोः सखी न परं द्रष्टु मप्युत्सहते।

तत्तेषा मेव चतुर्णां मन्यतमो वरणीयः ॥

सख्यौ—(विहस्य। दमयन्तीं प्रति) §§तुमं सि महाराअस्स वअणादो दाणिं देवदा। ता तुमं किल ण माणुसा वरेन्ति ॥

दमयन्ती—(सक्रोधम्) सहाओ किं मां परिहसह ॥

राजा—भवति नायं परिहासः। सत्य मेव देवा स्त्वां वरयन्ति ॥

दमयन्ती—(अपवार्य)सहि मह चित्तपरिक्खणस्स एवं वदइ तत्थभवं। ता कहेहि जं एत्थ दिट्ठं कहिदव्वं ॥

सख्यौ— *महाराअ इदो पुव्वमेव्व वम्महोवज्झाओवदेसेण भवंतं जेव्व वुदवदो अम्हाणं सही। ता ण जुत्तं भवन्तस्स एआरिसदोससंभावणावअणं। किं ण आणासि पडिव्वदाओ पिय मण्णं ण हिअएवि कुणन्तित्ति ॥

राजा—श्रूयतां भवत्यः।

नरं वृतवती नारी नरं न वृणुया त्परम्।

न ते नरा स्मुरा स्ते ऽलं कर्तुं यद्धर्म मन्यथा ॥ ६९ ॥

---

§§ त्व मसि महाराजस्य वचना दिदानीं देवता। त त्वां किल न मनुष्या वरयन्ति ॥

* सख्यौ किं मां परिहसथ ॥

§ सखि मम चित्तपरीक्षणा यैवं वदति त त्रभवान्। तत्कथय य दत्र दृष्टं कथयितव्यम् ॥

* महाराज इतः पूर्वमेव मन्मथोपाध्यायोपदेशेन भवन्त मेव वृतव त्यावयोः सखी। तन्नयुक्तं भवत एतादृशदोषसम्भावनावचनम्। किंनजानासि ता: प्रिय मन्य न हृदये ऽपि कुर्वन्तीति ॥

सख्यौ—§महाराअ किं मेदेहिं वयणेहिं । धम्मोवाहोदु अ हम्मोवाहोदु । देवोवाहोदु देवदेवोवाहोदु । ण भवन्त मन्तरेण हिअएवि कुणइ अण्णं अम्हे सहो ॥

राजा—भवत्यो मामेवम् ।

यो ऽपराध्यति सुराय नरो ऽसौ
नैव जीवितुमिवापि समर्थः ।
त त्कथं नुवृणुया मह मेनां
*त त्परित्यजत भो मयि तृष्णाम् ॥ ६६ ॥

सख्यौ—(दमयन्तीं प्रति) †सहि एव्वं साहइ तत्थभवं । इदो वरं तुमं जेव्व उत्तरं कहेहि ॥

दमयन्ती—(संस्कृत माश्रित्य)

नेशते मनसो देवाः प्राणो ऽपि नहि मे प्रियः ।
त्वया ऽनङ्गीकृतं गात्रं कथ मङ्गीकरो म्यहम् ॥ ६७ ॥

राजा—(सास्रम्) भवति किं करोमि मन्दभाग्यः । सत्य मेव देवै रेवमाज्ञप्तः ।

‡स्वय मुपनतां कोवा हातुं समुत्सहते श्रियं

---

§ महाराज किमेतै र्वचनैः । धर्मो वा भवतु अधर्मोवाभवतु । देवो वा भवतु देवदेवो वाभवतु । नभवन्त मन्तरेण हृदये ऽपि करोत्यन्य मावयो स्सखी ॥

* वज्राख्यं प्रतिमुखांगम् ।

† सख्येवं कथयति तत्रभवान् । इतः परं त्वमेवोत्तरं कथय ॥ साहइ इतिदेशी

‡ पुष्पाख्यं प्रतिमुखाङ्गम् ॥

फल मुपगतं कोवा हस्ते प्रसह्य निरस्यति ।
अयि शृणु हताशो ऽहं किं वा करोमि सुरेश्वरैः
त्वयि मम हत प्राणेवा त्याजितो ननुलालसाम् ॥ ६८ ॥

दमयन्तो—(बाष्पावरुद्धमुखो तूष्णीं भूय तिष्ठति) ॥

राजा—तेनहि सुराणा मुत्तरं देयम् ॥

सख्यौ—§सुणसु महाराअ कहिस्सामो एत्थ अम्हो उवायं । ते क्खु तुए कहिदव्यो दमयन्तो एव्वं कहेदित्ति ॥ (संस्कृत माश्रित्य)

स्वयं वरःप्रतिज्ञात स्तेन नैषधपञ्चमाः ।
त त्रायात वरिष्यामि स्वेष्टं कार्यां सुरैः क्षमा ॥ ६९ ॥

राजा—(स्वगतम्) स्त्रिया वपि सम्य गाहतुः । (प्रकाशम्)

सर्वत्र हन्त बलवान् भवितव्यभावः
प्राणै स्समाप्रियतमा गणिता सखी वाम् ।
एवं सति त्रिदशचित्तग तेय मासी
ज्जानाति को नु विषमं विधिदुर्विपाकम् ॥ ७०॥

(नेपथ्ये)

हन्त देवा निरीक्ष्यन्ते राजन् किमु विलम्ब्यते ।
प्रसादं देवनाथानां प्राप्तुं नावसरो ऽपरः ॥ ७१ ॥

सर्वे—श्रुत्वा । (भयंनाटयन्ति) ॥

---

§ शृणु महाराज कथयिष्यामो ऽत्र वय मुपा यम् । ते खलु त्वया कथयि तव्याः । दमय न्त्येवं कथयतीति ॥ उपन्यासाख्यं प्रतिमुखाङ्गम् ॥

राजा—हन्त देवसन्देशार्थं मागतेन मया ऽत्र न चिरं स्थात व्यम्। साधयोम स्तावत्। (इति निष्क्रान्तः) ॥

दमयन्ती—*अकारणोवगदं भाअद्देअ मुज्झिअ ण पारेमि धारेदु मप्पाणं। ता गच्छामो सअणगेहं ॥

॥ (इतिनिष्क्रान्ताःसर्वे) ॥

इति श्रीमन्मञ्जुलनैषधे महानाटके तृतीयोंकः ॥

———:*:———

॥ अथचतुर्थोंकः ॥

॥ शुद्धविष्कम्भः ॥

(ततः प्रविशति कलिः)

कलिः—आः कष्टं शून्यप्रायो यं लोकः। तथाहि ॥

सर्वे सत्पथ माश्रयेयु रिह चे द्भज्येत लोलेति मां
देव स्साधु जनप्रतारणविधौ स्थाने पटुं सृष्टवान्।
वारपक्रियया कृतादिविगमे यो मे ऽधिकारः स्थितः
सोयं कालवशेन संप्रति गत स्ताव न्निरर्थो स्म्यहम् ॥ ७२ ॥

(स्मरण मभिनोय) म माधिकारदशायाम् ॥

ननु कति कति लोका निन्यिरे नास्तिकत्वं
कति कति दृढचित्ताः पातिता स्संशयान्धौ† ।

---

*अकारणोपगतं भागधेय मुज्झित्वा नपारयामि धारयितु मात्मानम्। तद्गच्छा म शयनगेहम् ॥

†अन्धुः=कूपः।

कतिच निशमयन्त स्सम्य गुक्तिं गुरूणा
मचित† इव मया न प्रापिता स्तब्धभावम् ॥ ७३ ॥

एवंसति ।

जलस्थितानां करदुर्ग्रहाणां यथो झषाणां पलला§दिलिप्साम् ।
उत्पाद्यनिस्सार्य बहिः स्थितानांभवे त्कुवेणी‡धृति रप्रयत्नात् ॥

एवं खलु ममापि सत्पथच्युतानां जनानां निमिष§मात्रेण हस्तनिष्प्र
तः । इदानीं पुनः ।

दुरात्मनो हन्त कृतस्य राज्ये तत्प्रेरणालम्बितसद्विवेकाः ।
नसत्पथा त्केचिदपि च्यवन्ते तथापि नाहं विरमामि यत्नात् ॥

उक्तंहि । 'बलो पुरुषकारो हि दैव म प्यतिवर्तत' इति ॥ हन्त दम
यन्तीवृत्तान्तपरिज्ञानाय प्रेषित श्चिरायति प्रियसखः ॥

(ततः प्रविशति द्वापरः ॥)

द्वापरः—विपक्षपक्षकरगता पि रमयत्येव लक्ष्मीः । यतः ।

भैमीनैषधयो र्विवाहसमये कल्याणकल्यानक
प्रोद्यत्काहळभेरिकादि विविधध्वानैः प्रकीर्णा दिशः ।
आस्तां तत्खलु तन्महा*गतमहीपालेन्द्रमौळिस्फुर
न्माणिक्यप्रकरप्रभाप्रसरणैः को वा न रक्ताम्बरः ॥ ७६ ॥

---

† अचितः=न विद्यते चित्(=ज्ञानं) येषां ते । अचेतनानी त्यर्थः ।

§ पलम्=मांसम् ।

‡ कुवेणी=मत्स्यधानी ।

§ निमिषः=त्रिंशल्लवमात्रकालः । लवश्च शतत्रुटिमात्रकालः । त्रुटिर्नाम तीक्ष्णसूच्या अब्जपुष्पदळवेधमत्रकालः ॥' इति सर्वशब्द सम्बोधिन्या मस्म त्परमगुरुचरणाः ॥

* महः=उत्सवः ।

प्रियसखेन दमयन्तीवृत्तान्तपरिज्ञानाय प्रेरितो प्यहं नविवाहमहमद्दृष्ट्वा निवर्तितु मशकम्। तदतोव कालो विलम्बितः। तेनझडिति स्वयु स्समीपं गच्छामि ॥ (इतिपरिक्रामति। पुरोवलोक्य ॥)अये अ त्रैव वयस्यः। त देन मुपसर्पामि। (उपसृत्य)। कुशलं वयस्यस्य ॥

कलिः—अये आगतः प्रियसखः। स्वागतं प्रियवयस्यस्य ॥

द्वापरः—किं ब्रवोमि यथा गतम् ॥

कलिः—किं नु खलु दमयन्ती परहस्तं गता ॥

द्वापरः—(सवैक्लव्यम्)। अथ किं ॥

कलिः—कोसा वनात्मज्ञः ममापि मनोरथविषयां कुमारि कमभिलषति। (विमृश्य)। किं नु खलु सखे न भवता प्रकटोकृत राज्ञां समक्षम्। कलि र्देव एना मभिलषतोति ॥

द्वापरः—नकेवलं राज्ञाम्। अपितु देवाना मपि ॥

कलिः—(साशंकम्)। किंनुखलु देवाना मन्यतमेनैषा वृता ॥

द्वापरः—तथैव प्रथमम् ॥

कलिः—किं ततः ॥

द्वापरः—

सो मर्त्ये प्रथमं नले प्रणयि नोत्ये तत्प्रवादं मुनि
श्श्रुत्वा थोकलहाशन‡ स्स्वय मिदं व्यज्ञापय द्वासवम्।
तस्यै वाथ सभा मुपेत्य सहिता देवो हुताश स्स्वयं
पाशो दंडधरश्च त न्न्यशमयं स्तेषा मतो भूद्रतिः ॥ ७७ ॥

‡ कलहाशनः=नारदः।

कलिः—नून मेकदेशे ना स्मत्सधर्मा नारदः। तत स्ततः ॥

द्वापरः—

ते चेंद्रयमसप्तार्चिर्वरुणा भुव मागताः।

उपेत्य नलमे वैनं स्वस्य दूत्ये न्ययोजयन् ॥ ७८ ॥

कलिः—साधु साधु मूषकस्य भक्ष्यसंरक्षणे नियोगः। तत स्ततः ॥

द्वापरः—सापुन र्दमयन्तो दौत्येनागत मपि नल मेव मनसि कामयमाना यदि देवैस्सह समेत्य भवान् स्वयंवरोत्सवे समागमिष्य सि तदा म दोप्सतं वरं कामये इत्यवोचत् ॥

कलिः—ततस्ततः ॥

द्वापरः—*तच्च देवा नलमुखा दाकर्ण्य दमयन्त्याहृदयं ज.न न्त स्स्वयमपि चत्वारो नैषधरूप मादधानाः नैषधपंचमा स्स्वयंवरे समायाताः ॥

कलिः—सम्य क्चिंतितो वंचनोपायः। ततस्ततः ॥

द्वोपरः—एव मास्थितानां पंचानां मध्ये नैषधस्याभिज्ञानं व ह्श श्चिन्तयन्तो यथाकथंचि दपि नसंज्ञातु मसमर्था स्वस्य नलैक ³ णयपातिवृत्यं प्रकटयन्ती तेन धर्मेण प्रार्थितवती देवान् ॥

कलिः—ततस्ततः ॥

द्वापरः—†ततश्च धर्मवशवर्तिनो देवा यथास्वरूपाणि प्रदर्श्य नलं प्रादोदृशन्। तदादमयन्त्या नैषधो वृतः ॥

---

* अभूताहरणाख्यं गर्भसन्ध्यङ्गम्

† मार्गाख्यं गर्भाङ्गम्

कलिः—धिङ्मूर्खौ देवाः। य त्स्वहस्तगत मप्यामिष‡‡ मुत्सृष्ट वन्तः। य द्येवं कलिः स्या त्किं विमुञ्चेत्। ततः परं किं संवृत्तम्॥

द्वापरः—एताव न्निगूढोऽहं। तत स्साक्षा दुत्थाय कर मुद्य म्याब्रवम्। भो भो राजानः। भो भो देवाः। भो नैषध श्रूयतां सर्वैः॥

देवः कलि रिमां कन्यां स्वयं कामयते विभुः।
तस्य चित्तगता मेनां कथं मर्त्यः प्रतीच्छति॥ ७९॥

इति॥

कलिः—ततः किमुक्तं तत्रत्यैः॥

द्वापरः—न किंचि दप्युक्तं विहास मन्तरेण॥

कलिः—आः कष्ट मधिकारविपर्यये सर्वोपि भवति परिहासास्पदम्। (सक्रोधम्) रे मूर्खाः।

यद्य प्यस्ति कृतस्य सम्प्रति वशे कालो यमि त्युद्धतो
राजानं न कलिं हृदि स्मरथ भो स्त त्सर्व मास्तां पुनः।
एवं सत्यपि कश्चिद प्यवहितो न स्वेन तिष्ठे त्तत
स्सन्त्ये वावसरा दुराचरणत स्तत्राधिकारो स्ति नः॥ ८०

रे रे नैषध।

देवेन कलिना कन्यां कांक्षिता माददासि यः।
भोक्ष्यसे त्वं तया सार्धं भोगान् मूढ किय च्चिरम्॥ ८१॥

अये द्वापर कथंचि न्नलदमयन्त्यो र्विघटनप्रयत्नः करणीयः। त दत्र

‡‡ आमिषम्—मांसम्।

भवता सहायेन भवितव्यम् ॥

द्वापरः—यथा रोचते भवते । कथं पुनः प्रयत्नः करणोय इति चिन्तयामि ॥

कलिः—विचिन्त्य ह न्तैवं करोमि । नल स्यानाचारावसरं निरोक्ष्य त माविश्य तदायादं पुष्करं द्वारोकृत्य तेन सह द्यूतोन्मुखं करोमि । ततश्च मत्प्रभावकलुषितचित्तः राज्यं दमयन्तीं च विहाय भ्रष्टो वनान्तरेषु संचरिष्यति ॥

द्वापरः—साधु चिन्तितं भवता ।

सिद्ध्ये न्न वे ति किल सांशयिका स्वकार्ये
यत्नं त्यजन्ति यदि तेन कि मत्र लब्धम् ।
सिद्धे ष्सितानुशय स्तु भवे दवेक्ष्य
यत्ने कृते यदि न सिद्धचति कोत्र दोषः ॥ ८२ ॥

तदे हचनन्तरकरणोयाय सज्जोभवावः ।

(इतिनिष्क्रान्तौ)

॥ शुद्धविष्कम्भः ॥

(ततः प्रविशति पर्याकुलचित्तो राजा ॥)

राजा—

राज्यश्री र्न सकंटका§ प्रकृतयो‡ न प्रातिकूल्यं गता

---

§ कण्टकः=क्षुद्रवैरी । ष्ट्रदुर्गबलानिच। राज्याङ्गानिप्रकृत
‡ प्रकृतयः=स्वाम्यमात्यसुहृत्कोशरा यइत्यमरः ॥

नो वा जोवितवल्लभा नृपसुता प्राप्ता प्रदेशान्तरम् ।
एवं सत्यपि चित्त किं नु भवतो पर्याकुलीभूयते
भूताविष्ट इ वास्मि हन्त सहसा कोयं विधेः प्रक्रमः ॥ ८३ ॥

(विचिन्त्य) । नून मिदं स्यात् ।

अचिरप्रसूतदयितासमागम
प्रतिरोधकारणक मेव चापलम् ।
इद मित्थ मि त्यविदितं क्रमेण मे
परिणाम मोदृश मुपैति मानसे ॥ ८४ ॥

(पुननिरूप्य) । मामैवम् ।

आगर्भाभिव्यक्ते रंगै रवरुद्धमनसिजोद्योगैः ।
दूरा दपि दृष्टा मे मानस मानन्दय त्येव ॥ ८५ ॥

अपिच ।

अनतिचिर मगाढं पात्र मोषद्दयाया
व्यतिकरकृत मात्तस्पर्शमात्रं क्रमेण ।
अभिनयकृत मंगै रं गनालिंगनं मे
न कि मतनुत मोदं कल्पयन्तो कटाक्षैः ॥ ८६ ॥

त दाश्चर्य मे वैतत् ॥

(नेपथ्ये) अब्रह्मण्य मब्रह्मण्यम्† ॥

राजा—क स्को ऽत्र भोः ॥

---

† अब्रह्मण्यम्=अवध्योक्तिः ॥

(प्रविश्य) दौवारिकः—§जेदु देवो ॥

राजा—ज्ञायतां भोः कि मेत दब्रह्मण्य मिति ॥

दौवारिकः—दुरात्मभि र्धूर्तै रपहृतसर्वस्वो ऽहम स्मोत्यु र स्ताडयमानो ब्राह्मणः कश्चि दाक्रोशन् द्वार मध्यास्ते ॥

राजा—आगमयस्व तावत् ॥

दौवारिकः—†तह (इतिनिष्क्रान्तः) ॥

(ततः प्रविशति गृहीतब्राह्मणवेषः कलिः) ॥

कलिः—(आत्मगतम्)कलुषितं कथं चि दस्य राज्ञो मानस म निर्दशप्रसवाया* एत त्पत्न्याः कृतांगाभिमर्शेन पवनेनकृतं देहस्प र्शं निमित्तीकृत्य । एतावतापि न कृतकृत्य मात्मानं मन्ये । (इति परिक्रम्य । पुरोवलोक्य) । अय मत्रैव कलुषीभूतमानसो राजा चि न्तापरायणो दृश्यते । अय मे वावसरो ऽभीष्टलाभस्य । (प्रकाशम्)। अब्रह्मण्य मब्रह्मण्यम् । त्रायतां महाराजः ॥

राजा—कस्मा द्भोः ॥

कलिः— कैतवकृता दनर्थात् ॥

राजा—कोय मनर्थः ॥

कलिः—कि मन्य दपहृतं सर्वस्वं मम दुरात्मभिः ॥

रजा—किं निमित्तम् ॥

कलिः—कि मन्य द्विनिपात मन्तरेण ॥

---

§ जयतुदेवः ॥ † तथा ॥

* प्रसूताया यस्याः दशदिनानि नातिक्रामन्ति । तस्याः ॥

राजा—आः अस्माकं प्रजासु विनिपातः§ इति न विश्वसनीय मेतत् ॥

कलिः—(सकोपाभिनयम्) । हा हतोस्मि मंदभाग्यः ॥

आपन्नरक्षणं कर्तु मसमर्थेन भूभृता ।

हन्त प्रतार्यमाणस्य† का गतिर्मम साम्प्रतम् ॥ ८७ ॥

राजा—भो वृद्धब्राह्मण माभैषीः । याचकुपः । कथं के नापहृतं किं निमित्त मिति मया पृष्टम् ॥

कलिः—अल मसमर्थस्य कालहरणार्थैः प्रश्नैः ॥

राजा—श्रूयतां भोः ॥

*यथा येन हृतं वित्तं विषये‡‡मम सांप्रतम् ।

तथैव तस्मा दाहृत्य दीयते तावकं धनम् ॥ ८८ ॥

कलिः—यदि सत्य मिदम् ॥

राजा—तत्र कस्सन्देहः ॥

कलिः—राजन् तर्हि श्रूयताम् । भवदीयो दायादः पुष्करो द्यूताय मामुपाह्वत्† । अहं च कौतुकात्तत्प्रवृत्तः । एवं प्रत्यहं प्रवर्तमाने द्यूते कदाचि त्क्रोधावेशा त्सर्वस्वं पणीकृत्य दूत मारब्धम् । त ताहं पराजितो स्मि ॥

---

§ विनिपातः=दैवोपहतिः । आन्ध्रे- 'चेटु' ॥

† प्रतार्यमाणः=भर्त्स्यमानः । आन्ध्रे बेदरिंपबडिनवाडु ॥

* तोटकाख्यं गर्भाङ्गम् ।

‡‡ विषयः=देशः ।

† उपाह्वत् । उपपूर्वात् ह्वेञः लुङ् । लिपिसिचिह्वश्चेत्यङ् ।

राजा—यद्येवं न किंचिदेतत्। यावत् तवधनं जेनापहृतं तावद्दस्माभि र्दीयते ॥

कलिः—आः किमेवं प्रतिज्ञात मन्यथा क्रियते। यथा येन हृतं तथा तस्मा दाहृत्य दीयत इति ॥

राजा—तर्हि तस्मा देव पुष्करकात्मतिदानेन तव धन माहृत्य दीयते ॥

कलिः—मा मैवं। तेन हि द्यूतेन हृतम् त त्तेनैवाहृत्य दातव्यम् ॥

राजा—(आत्मगतम्। सविषादम्)। किमिदं मुक्तं मया रोषावेशात्। त त्तथै वाहृत्य दीयत इति। कथ मिमां प्रतिज्ञा मन्यथाकरिष्यामि, कथं वा ज्ञातदोषमपि द्यूत मेतदर्थे परिगृह्णीयाम्। आः प्रमादः। (प्रकाशम्)। भोमहाब्राह्मण प्रसीद द्यूत मन्तरेण कथमपि धन मादातुम् ॥

कलिः—राजन् लज्जाशोकाभ्यां दह्यमानो ममात्मा ना न्यथा प्रसीदति ॥

राजा—(सखेदम्) हन्त को नोपायः। (विचिन्त्य)।

† अन्याः किंचन संवतं हि विधिना सूतं कलानिधेः
तद्वक्त्रादि परोक्षता मुपगता न्यस्ताश्च चैकादश।

† अधिबलाख्यं गर्भाङ्कम्।

§ अक्षाणि—इन्द्रियाणि। स्व चक्षु श्रोत्र जिह्वा घ्राण मनो वा क्षाणि पा द पा यूपस्थानीति एकादशेन्द्रियाणि।

तेषा मन्त रयं च पञ्चरशुकन्यायेन जीवः स्थितः

सर्वं वेत्ति च वक्ति द्वृत्तिषु पुन स्ता यन्नपाञ्चालिका ॥ ८९

तेन हि सर्वथा न द्यूत मन्तरेण सत्यसंरक्षणं शक्यं कर्तुम्। कस्को ऽत्र भोः ॥

(प्रविश्य) दौवारिकः ॥

राजा—पुष्करकं द्यूतेनोपाहातु मिच्छामि। तेन परेद्यु द्यूत संभारा स्सर्वे सज्जीक्रियन्तां मित्यमात्य सुमतये निवेदय ॥

दौवारिकः—§तह। (इति निष्क्रन्तः) ॥

राजा—ब्राह्मणसाधयेदानीम्। परेद्यु र्यथाभिहितमनुष्ठीयते ॥

कलिः—अवितथप्रतिज्ञो भूयाः। अनुजानीहि मां पुनर्दर्शनाय (इतिनिष्क्रान्तः) ॥

राजा—वय म प्यन्तःपुर मेव गच्छामः ॥

(इति निष्क्रान्ता स्सर्वे)

इति श्रीमन्मञ्जुलनैषधे महानाटके चतुर्थोंकः ॥

———:*:———

॥ अथपंचमोंकः ॥

॥ शुद्धविष्कम्भः ॥

(ततः प्रविशति यजमानशिष्यः) ॥

अये प्रभातप्रायैव विभावरी ।

तमसि गलिते किं चिच्छेषे सरोरुहकुट्मले

§ तथा ॥

स्सरसि दलितं किंचि त्किंचिच्च मीलित मुत्पलैः ।
इति समदशा मेषु प्राप्ते ष्वपि प्रकटीकृतं
मधुरसभरास्वादमौढै र्मु दालिभि रन्तरम् ॥ ९० ॥

तद्भगवता स्मद्गुरुणा दमनेन क्रियमाणे शान्तिककर्मणि समिदाहरणाय निरुक्तो स्मि । त दचिरा देव समिध स्मंपादयामि । (पुरोवलोक्य) । अये पुर एवा स्मत्प्रियसखो वटु स्सम्भ्रान्त आगच्छति । किं नु खलु कारणं स्यात् ॥

(ततः प्रविशति संभ्रान्तो वटुः ॥

वटुः—आर्य हारित अत्याहितमत्याहित* मस्मिन् वने ॥

शिष्यः—किं तत् ॥

वटुः—श्रूयताम् ।

अतिरुचिर मनर्घ्यं रूप मास्थाय का चि
न्मनुजयुवतिदम्भा द्भ्रंशयन्तो मनुष्यान् ।
चरति मलिनचेला पांसुसंवीतगात्री
कृशतरसकलांगो देवता दानवो वा ॥ ९१ ॥

शिष्यः—सन्त्येव वनदेवताः किंतु प्रायेण न प्रत्यक्षीभवन्ति ॥

वटुः—अत एव हि भयाकुलं मे हृदयम् ॥

शिष्यः— तथापि न भयकारणं ते ।

---

* अत्याहितम्—महाभीतिः ।

वनत्राणाय सर्वत्र चरन्ति वनदेवताः ।
न कां श्चि दपि बाधन्ते न ताभ्यः कोपि बिभ्यति ॥ ९२ ॥

वटुः—मा मैवम् । कालरात्रेरिव§ तया बहवः क्षयं नीताः प थिकाः ॥

शिष्यः—किं प्रत्यक्षोकृत मिदं भवता ॥

वटुः—अथ किम् ॥

शिष्यः—कथ मिव ॥

वटुः—शृणु तावत् । पूर्वेद्यु स्सायाह्न समये ।
ह्रेषाभि घोंटकानां रथपदनिनदै र्बृंहणैर्वारणानां
गन्त्रीसम्बद्धधावज्जवनगवगल स्फारघण्टाविरावैः ।
भिन्दन्नाच्छिद्य रोदोगहनमिव दरोमुप्रतिध्वानमिश्रैः
स्सार्थं सम्पूरितार्थप्रकरदरचलत्पेटिकः प्रादुरासीत् ॥ ९३ ॥

शिष्यः—अहो महावणिग्भि र्भवितव्यम् ॥

वटुः—ते किल चेदिराजपट्टणं प्रति जिगमिषन्तो रत्नवणि जः ॥

शिष्यः—ततस्ततः ॥

वटुः—तं सार्थमन्वाग तैषा व्यक्तिः ॥

शिष्यः—किं तावता ॥

वटुः—सा किल नदीतीरे कृतवसति मेनं विलोक्य,

§ कालरात्रिः=यस्यां प्रलयो भवति स रात्रिः ॥

वनमातंगरूपेण वनिता हन्त सा ध्रुवम् ।
निद्राणं सकलं सार्थं निशीथे सममोमृदत् ॥ ९४ ॥

शिष्यः—भो अविश्वसनीय मेतत् । सन्त्येव वने गजयूथानि । तै रेव स्वयं मर्दितः किं नभवे त्सार्थः ॥

वटुः—मा मैवम् । प्रात र्हतशेषै र्जनै रेवमेव व्यवहृतम् । का चिद्देवतावा दानवो वाऽस्माभि स्सहा गता । सार्थं सर्वं रूपान्तरेण समहार्षी न्नून मिति ॥

शिष्यः—(विमृश्य) । किं नु तेषा मपि भ्रान्ति र्नस्यात् ॥

वटुः—मा तावत् । सा प्येवं ब्रुवाणेषु हतशेषेषु जनेषु तां यद्यद्रक्ष्याम, समहरिष्यामे त्यु च्चै र्भयानकं प्रलपत्सु तै रदृष्टै व श नै रस्मद्वनं प्रविष्टा । अहं पुन रप्रकाशएवदूरा देत त्सर्वं पश्य न्निहा गतोस्मि ॥

शिष्यः—नैतावताप्य संशयं जातम् । किं तेषां वच श्श्रुत्वा निष्कारणं भ्रान्ता एत आत्मानं हन्यु रिति भया देव निर्गता न स्यात् ॥

वटुः—अन्य द प्यस्ति बलव दिह लिंगम् । आगच्छन्तो चे यमस्मद्वने पथिकैः पृष्टा का त्व मिति । शनैः प्रत्यवोच दहं दमय न्ती भोमात्मजेति । किं तवा त्रागमनकारण मिति पृष्टा विधिनियो ग इति च । ततश्च न किंचि दवोचत् । त देषा न मानुषी । ना म चास्या अन्वर्थ§ मिति निरचैषम् ॥

§अन्वर्थम्—अर्थं मनुगतम् अन्वर्थम् । अनुगतार्थं सत्यानामे तिनिरचैषमि

शिष्यः—(स्मृति मभिनोय। विहस्यच)। साधु वटो सम्य ग भ्यूहितं त्वया। तवहि सानैषधराजपुरन्ध्रो केवल ममानुजोजाता॥

वटुः—कथ मिव॥

शिष्यः—अस्ति विदर्भाधिपति र्भीमो नाम कण्डिने‡॥

वटुः—श्रुतः। यस्मै किलास्मद्गुरुणा वरप्रदानेन पुत्रिका पु त्रा श्चानुगृहीताः*। तत स्ततः॥

शिष्यः—साच पुत्रिका स्वयंवरेण नलस्य पत्नी जाता। दु रात्मना कलिना भिलषिता॥

वटुः—तत स्ततः॥

शिष्यः—सच स्वप्रार्थना मलभमानो नैषधे दमयन्त्यां च द्वे षमादधान श्चित्तविक्षेपजन्येन द्यूतच्छलेन महता नर्थेननैषधं राज्या द्भ्रंशयित्वा दमयन्तीविरहितं च कारयित्वा एवं भ्रामयति॥

वटुः—कथं पुन रनयो र्दंपत्यो र्विश्लेषो जातः॥

शिष्यः—द्यूते पुष्करकेण दायादेन जितोहृतराज्य स्तदाज्ञया पौरै र प्यनादृतो दमयन्तो सहायो वनं प्रविष्टः। तत्र चकल्यावे शकलुषमनाएकाकिनीं सुप्तां विहाय वनान्तरं गतः। एषाच तद्विरहि ता त मेवमार्गयमाणा दुःखाकुला स्वपितु र्वैदर्भस्य नगरमार्ग मप्य

त्यर्थः॥

‡ महाभार॥ अरण्यप॥ ७३अ॥ २श्लो॥

* अपुत्रिणे भीमाय दमनमहामुनिः पुत्रीं दमयन्तीं; दम, दान्त, दमनाख्यां स्त्रीन् पुत्रांश्चवरंददौ॥ इति महाभारते॥ अरण्यप॥ ५३अ॥ ५, ६, ७, ८, ९श्लो॥

जानाना तत इत उन्मत्त व चरन्तो त्वया दृश । सोपि नैषधः पुनर्लब्धसंज्ञःपरमार्त स्ता मेव मार्गयमाणो वने चरति ॥

वटुः—(साश्चर्यकरुणम्) । कथ मिव सर्वं विदितं भवता ॥

शिष्यः—स्वप्नभावसाक्षात्कृत परोक्षापरोक्षतत्व स्यास्मद्गुरो र्मुखात् ॥

वटुः—तर्हि कि मस्मद्गुरुणा तूष्णीं भूतम् ॥

शिष्यः—नहि नहि, अतएव हि शांतिक मारब्धम् ॥

वटुः—युज्यते ॥

शिष्यः—(स्मरणमभिनीय) । अये तदर्थ मेव समिदाहरणाय प्रस्थितो स्मि । अन्तरितं चेदं तव संलापेन । त न्न चिरेणात्र स्थात व्यम् । तदहं साधयामि ॥

वटुः—अह मपि गुरो स्सकाशं गच्छामि ॥

(इत्यु भौ निष्क्रांतौ)

॥ इतिशुद्धविष्कम्भः ॥

———:*:———

(ततः प्रविश त्युन्मत्तवेषो राजा) ॥

राजा—

एकाकिनीं सह वने विजने वसन्तीं
सुप्तां विहाय दयिता मयि तां कथंनु ।
आगत्य मानसबला दधु नानुशेषे
लब्धुं स्वतः परिहृतं स्व पि वातिदीनः ॥ ९९ ॥

9-10-96

(आकाशे कर्णं दत्त्वा) कथ मार्तस्वर इव श्रूयते। किं मया परित्य क्ता एकाकिनी सोमन्तिनी क्रन्दति। (विभाव्य)। अये नायं प्रि याया आर्तरवः। किंतु।

कानने विचरन्तोनां कूररोणा मयं रवः।
दूरे णाकर्णितो हन्त नायं प्रियतमा स्वरः ॥ ९६ ॥

किं नु खलु मया विसृष्टा प्रियतमा कथ मपि स्वपितु र्नगरं प्रविशे त्। अथवा।

मा मेव चिन्तयन्ती सा विमृश्य च यथोचितम्।
हा हा नाथेति धावन्तो ततः प्राणान् परित्यजेत् ॥ ९७ ॥

(विचिन्त्य)। भवतु पुनरपि तमेव प्रदेश मभ्युपेत्य मार्गयिष्यामि। यत्र प्रियां विहा यागतोस्मि। (इतिपरिक्र म्यावलोक्य च)अये शू न्योयं प्रदेशः। अशरणोस्मि किं करवाणि। (विमृश्य)। भवत्वे न मेव प्रदेशं पृच्छामि। अये प्रदेश।

त्वय्येव हन्त संत्यज्य यातो स्मि मम वल्लभाम्।
अभियोज्य स्त्व मेवा द्य नार्थो ऽस्मोक मिदेतरैः ॥ ९८ ॥

(विभाव्य)। तूष्णो म्भूतो यं प्रदेशः। प्रत्युत्तरं न ददाति। अथवा। दत्त मे वोत्तरं।

प्राणप्रिया मेव गतो विहाय
भवान् प्रसुप्तां विजने वने स्मिन्।
संबन्धलेशो पि म मै तया न

दोषो ऽनपेक्षस्य क इत्युदास्ते ॥ ९९ ॥

पुनर्विमृश्य) । किं नु खलु श्वापदानां वशंवदा भवेत् । (दूरादवलोक्य) । अये दूरतो निकुञ्जे शार्दूल इवदृश्यते । भव त्वेनं पृच्छामि । भो श्शार्दूलराज । किं मम प्रियां त्वं दृष्टवा नसि । (स्वगतम्) । आः किं नु खलु गर्जति । (प्रकाशम्) । श्रूयतां भोः ।

मम प्रिया मल्ल वने विहाय
गतो स्मि नान्योल्ल विलोक्यते तः ।
पृष्टोसि किं गर्जसि नेदृशीनां
बिभोषिकाणां विषयो ऽत्ल कश्चित् ॥ १०० ॥

आः पुन रपि तथैव गर्जति । दुराग्रहशोलानां मूर्खाणा मयं स्वभावः । परित्यजा म्येन मन्यतो गच्छामि ।(इति परिक्रम्यावलोक्य)। हन्त पुर एव रक्ताशोकः । भवतु ताव देनं पृच्छामि ।

आशो काशो कोसि त्व मह मतिशोकाकुलमना
स्ततः पृच्छामि त्वां कथय कि मपश्यः प्रियतमाम् ।
त्व मामूलं पुष्पै रसि खलु समृद्धः कि मपरं
तदंघ्रिस्पर्शां त्ते कथ मय मृते पुष्पविभवः ॥ १०१ ॥

त दभिज्ञो सि धुवं प्रियोदन्तस्य । (विभाव्य)। हन्त शाखाकरै स्तिर्यक्चालितै र्नेति वदति । अकरुण एषः । भवतु ताव दत्रा स्ति सहकारद्रुमः पल्लवितः । त दय मनुयुज्यते । अये सहकार ।

पृच्छामि सौम्य सहकार वद प्रियाया

वृत्तान्त मीष दपि न त्व मशोकतुल्यः ।
नामैव ते प्रकटय त्युपकर्तृभावं
जानी हि पल्लव मिवोस्ति तवाधरो स्याः ॥ १०२ ॥

अये अय मपि तथैव नेत्याह । आः परापकारबद्धादरा वेतौ । कि मि त्यहं पृच्छामि ।

अशोक स्सहकारश्च पान्थप्राणापहारिणौ ।
एता वर्पयतो बाणौ कन्दर्पा यान्यथा कथम् ॥ १०३ ॥

तिष्ठता मेतौ । एष सहकारतरौ प्रियासहचरः कोकिलो रौति । त दहं पृच्छामि ।

अयि कोकिल शृणु वचनं
मधुरं ननु भाषते त्व मिव रामा ।
किमु दृष्ट्वा नसि त्वं
तस्या मुखचंद्र मकलंकम् ॥ १०४ ॥

(कर्णं दत्त्वा) आः कुहूः कुहू रि त्याह । विदितो स्य स्वभावः । त न्मुखचन्द्रस्य कुहू* रेषो ऽवसर इति । हन्त नष्टैव सा ।(सखेदम्) ।

हा पूर्णचन्द्रमुखि हा मदिरोयताक्षि
हा नैषधप्रियतमे क गतासि हित्वा ।
त्वा मेष यद्यपि कृपा मपहाय जहयां
त्वं नेदृशो कथ महो न ददासि वाचम् ॥ १०५ ॥

---

* कुहूः—सानष्टेन्दु कला कुहूः इत्यमरः ।

(स्मरण मभिनीय) हन्त सर्व मिदं दुरात्मनः पुष्करकस्यदुश्चेष्टितम् । (आकाशे लक्ष्यं बद्ध्वा) । भोः पुष्करक ।

द्यूतापदेशा दपहृत्य राज्यं
नैतावता तृप्ति मुपागतो सि ।
नेता स्ति कश्चिद्भवतो विनेता
याता सि तस्यैव करं कदापि ॥ १०६ ॥

भव त्वशरणो हं । चराम्युन्मत्त इव । अथवा कि मन्योस्ति मत्त उन्मत्तः ॥

(नेपथ्ये)— राजन् परित्रायस्व परित्रायस्व ॥

राजा—(कर्णदत्वा । उच्चैः) क स्त्वं कस्मात् ॥

(पुनर्नेपथ्ये)—

कर्कोटको नाम नरेन्द्रनाग
स्सोहंप्रलंभा त्किल नारदस्य ।
यातो स्मि हन्ताचलतां दवान्त
श्शापस्य चान्त स्तव सुप्रसादः ॥ १०७ ॥

राजा—(सानुक्रोशम्)माभैषीः । अय मह मुद्धरामि त्वां दवानलात् ।

(पुनर्नेपथ्ये)—

परोपकार धर्मो ऽयं ना पन्ने नापि विस्मृतः ।
य त्तत्प्रभवता तस्मात्कल्याणं ते भविष्यति ॥ १०८ ॥

13-10-96

अवितथ मस्तु भव द्वचनम्* ॥

(इति निष्क्रान्तः)

इति श्रीमन्मञ्जुलनैषधे महानाटके पंचमोंकः ॥

———:*:———

॥ अथषष्ठोंकः ॥

॥ मिश्रविष्कम्भः ॥

(ततः प्रविशति ऋतुपर्णसारथि र्वार्ष्णेयः) ॥

वार्ष्णेयः—आदिष्टो स्मोदानी मेव प्रविष्टे नैतन्नगर मृतुपर्णे नायोध्याधिपतिना महाराजेन स्वागमनवृत्तान्तं महाराजभीमाय निवेदयितुम्। त द्राजभवनं गच्छामि। (पुरो ऽवलोक्य)। अये त दे त देव्या दमयन्त्याः पितु र्भीमस्य नगरम्। अनेन स्मारितो स्मि दमयन्तो नैषधयो र्वृत्तान्तम्। श्रुतं मया। दमयन्तो स्वपितु र्भीम स्य गृहं प्रविष्टा। सर्वथा नल मपश्यन्ती पुन स्स्वयंवराय राजन्या नुपस्थापयतीति। हन्त दमयन्त्या नलैकदेवताया अ प्येवं करिष्यत इति गर्हणीयो विधिः†। इद मेव चोद्दिश्य महाराजऋतुपर्णे नाप्या गतम्। (विचिन्त्य)। किं नु खलु दमयन्त्याः पुन स्स्वयंवराय राजा न स्सर्वे आगमिष्यन्तीति श्रुतम्। न महाराज मन्तरेण को प्यत्र दृश्यते। (विभाव्य)।

किं मिथ्यैव प्राह विप्रः प्रवृत्तिं

---

* आक्षेपाख्यं गर्भाङ्गम् ॥

† अपवादाख्य मवमर्शाङ्गम् ॥

किं वा सत्योदितसंत्यक्त मेतत् ।
किं राजानः किं चि दायान्ति मन्दं
किं वा कै श्चित्कल्पितो दम्भ एषः ॥ १०९ ॥

भवतु राजपरिजनेषु य द्येकोपि दृश्येत तै स्सर्वं व्यक्तोभविष्यति । (इति परिक्रम्य पुरोवलोक्य) । अये अस्मदेव्या दमयन्त्याः प्राणप्रिया केशिनो सहर्ष मिवा याति । त देषा पूर्वपरिचिता । किं चि द स्माकं वदे द्रहस्यम् । त देना मभिगच्छामि ॥

(ततः प्रविशति केशिनो)

केशिनो—*अज्ज उण महाराअभीमस्स णिदेसं उवलम्भि अ दमयन्तीए आदेसेण ऋदुवण्णसारहिणो बाहुकस्स आन्तेउर णयणस्स पत्थिद म्हि । अहवा । णेसढस्स । तेण हि तुरिदं गच्छामि ॥

वार्ष्णेयः—केशिनि चिरपरिचितं मा मनादृत्य क्व गच्छसि ॥

केशिनो—†अये इदो सो नेसढसारहो वण्हेयो आअच्छदि । कहं उण एदस्स आगमणं । ता णं उवसप्पामि । (उपसृत्य) अज्ज वंदे । मरिसेहि मं । कज्जवसादो ण दिट्ठोसि ।

वार्ष्णेयः—भद्र मस्तु भवत्यै ॥

---

* अद्य पुन र्महाराजभीमस्य निदेशं उपलभ्य दमयन्त्या आदेशेन ऋतुपर्ण सारथे र्बाहुकस्य अन्तः पुरनयनाय प्रस्थिता ऽस्मि । अथवा । नैषधस्य । तेन हि त्वरितं गच्छामि ॥ नैषधशब्देधस्य 'निषधेधोढ' इति ढः ॥

† अये इत स्स नैषधसारथि र्वार्ष्णेय आगच्छति । कथं पुन रेत स्यागमनम् । तदेन मुपसर्पामि । आर्य वन्दे । मर्षय मां कार्यवशात् न दृष्टो ऽसि ॥

केशिनो—*अज्ज वण्हेअ कुदो आगदो सि ॥

वार्ष्णेयः— इदानो मे वागत स्यायोध्याधिपतेः ऋतुपर्ण स्य सकाशात् ॥

केशिनो— (सखेदम्) †किं णु क्खु णेसढे भट्ठरज्जे उदुवण्णं ओलम्बेसि ॥

वार्ष्णेयः —अथ किम् । द्यूतानर्थमहार्णवनिपतितं नैषधं सर्व धा ऽय मनर्थपर्यवसा यीति देव्या दमयन्त्या स्वापत्ययो रिन्द्रसेने न्द्रसेनयो रि हानयनाय नियुक्त स्तथा कृत्वा कु त्रापि जो वेति निदेशादेशान्तरेषु सञ्चरन् ऋतुपर्णस्य महाधार्मिकस्य राजर्षे स्स न्निधिंप्रविष्टः ॥

केशिनो—‡ जुज्जइ ॥

वार्ष्णेयः—सखि पृच्छामि कि श्चि द्रहस्यम् । किं नु खलु दमयन्त्याः स्वयंवराय कैश्चि दपि ऋतुपर्ण मन्तरेण नागतंराजन्यैः।

केशिनो—(विहस्य) । §किं विअ ॥

वार्ष्णेयः—सखि न मा मन्याश्रित म प्यन्यं मन्तु मर्हसि ॥

केशिनो—*तुइ कि मकहणिज्जं णाम । सुणु दाव । णेसढस्स राएसिणो मग्गणस्स पत्थिदेसु अणेएसु बम्हणेसु ण मुणीअदि

---

* आर्य वार्ष्णेय कुत आगतोसि ॥

† किं नु खलु नैषधे भ्रष्टराज्ये ऋतुपर्णे अवलम्बयसि ॥

‡ युज्यते ॥

§ किं मिव ॥

* त्वयि किं मकथनीयं नाम । शृणु तावत् । नैषधस्य राजर्षे र्मार्गणाय प्रस्थि

सो राएसी इध वट्टदित्ति ॥

वार्ष्णेयः—तत स्ततः ॥

केशिनो—†अंतदो उदुवण्णस्स एव्व राएसिणो सआस म्मि को वि बाहुओ णाम तुरंगमसिक्खओ ॥

वार्ष्णेयः—जाने। अश्वलक्षणं स सम्य ग्जानाति। तस्यैव चान्ते तद्विज्ञाना यादं चरामि राज्ञो नियोगेन। तत स्ततः ॥

केशिनो— ‡तेण उण गूढआरिणा गुढद्धअदमयन्तोवाचिअ स्स उत्तरं दिण्णं। तेण पडिआसा उप्पण्णा देवोए। तदो उदुव ण्ण मुज्झिअ सो णायमिस्सदि त्ति कप्पिदो अयं उवाओ ॥

वार्ष्णेयः—ह न्तासंशय मिदानीं जातम्।

या तृणाय पुरा मेने पुरन्दरमुखां स्सुरान्।
नलैकदेवता सैषा कि मन्यं नर मोहते ॥ ११० ॥

कथं पुन रिह ऋतुपर्णस्य राजर्षे रकारणाद्भूतस्य चित्तसमाधानं क र्तुं शक्य मिति चिन्तयामि ॥

केशिनो—§पुढमं एव्व तस्स समाहो चिंतिदो ॥

वार्ष्णेयः—कथ मिव ॥

ते ष्वनेकेषु ब्राह्मणेषु नज्ञायते स राजर्षि रत्र वर्तत इति ॥

† अन्तत ऋतुपर्णस्यैव राजर्षे स्सकाशे को ऽपि बाहुको नाम तुरंगमशिक्षकः॥

‡ तेन पुन र्गूढचारिणा गूढार्थकदमयन्तीवाचिकस्य उत्तरं दत्तम्। तेन प्र त्या शोत्पन्ना देव्याः। ततो ऋतुपर्णं त्यक्त्वा स नागमिष्यतीति कल्पितो य मपायः।

§ प्रथम मेव तस्य समाधि श्चिन्तितः ॥

केशिनो—(कर्णे एवमिव)* ॥

वार्ष्णेयः—युज्यते । ननु पृच्छामि किं माहूतेन बाहुकेन नैषधस्य वा तोपलब्धो ॥

केशिनो—‡अह ई । सोएव्व एसो त्ति संसओ ॥

वार्ष्णेयः—कथमुपपद्यते ।

दीर्घबाहु रतिमञ्जुलाकृति
र्मूर्तिमा निव मनोभवो नलः ।
ह्रस्वदो र्विकृतविग्रहः पुमा
नेष इ त्यय मकाण्डसंशयः ॥ १११ ॥

केशनो—†सच्चं । तह वि बलवंति असाहारणाइ चिन्धाइ इमस्सिं उवलद्धाइ । किं बहुणा । सूदविज्जाए वि तं एव्व विण्णाणं ॥

वार्ष्णेयः—किं देव्या तत्पाक आस्वादितः ॥

केशिनो—§अह ई ॥

वार्ष्णेयः—(विचिन्त्य)*सत्य मश्वहृदयज्ञो महाराजोनैषधः ।

---

* एतद्वाक्यं सप्तमेंके दमयन्ती वाक्ये स्फुटंभाविष्यति ॥

‡ अथ किम् । स ए वैष इति संशयः ॥

† सत्यम् । तथापि बलव न्त्यसाधारणानि चिह्ना न्यस्मि न्नुपलब्धानि । किं बहुना । सूदविद्याया मपि तदेवाविज्ञानम् । 'चिह्ने न्धो वा' इति संयुक्तस्यन्ध इत्यादेशः ॥

§ अथ किम् ॥

* शार्ङ्गिनामावमर्शोगम् ॥

अय मपि तथाविधः । कथ मन्यथा गणरात्र निर्वर्तनीय मिदं प्रया ण मेके नाह्ना निर्वर्तित मृतुपर्णस्य महाराजस्य । रूपविपर्ययः पुन रयं विसंवादहेतु र्दुस्समाधानः ।(निरूप्य)। भव न्त्येव केषां चि त्कै श्चनकारणै रूपविपर्ययः । श्रू यन्त एवे तिहासेषु बहवो भूपा श्शा पाभिहता राक्षसतां गता इति ।(नल मुद्दिश्य) ।

हा नैषध महाराज नीतो दैवेन दर्दशाम् ।
के नास्येवंविधो भूयो हन्ति हन्त हतं विधिः ॥ ११२ ॥

सखि यथा भव्यं तथा भविष्यति ॥

केशिनो—§सच्चं होदु तुह वअणं ।(स्मृतिमभिनीय)। हन्त म हारोजस्स अणुमदीए देवीए दमयन्तीए निउत्ता तं एव्व बाहुकं अ न्तेउरं णेदुं । ता साहेमि ॥

वार्ष्णेयः—अह मपि महाराजऋतुपर्णस्यागमनं महाराजभी माय निवेदयितुं प्रस्थितः ॥

(इति निष्क्रान्तौ)

॥ मिश्रविष्कम्भः ॥

(ततः प्रविशति दमयन्ती)

दमयन्ती—(सोत्कण्ठम्) †किं णु क्खु महानुभावो अज्जउत्तो एव्व केण वि कारणेन बाहुअसण्णाए रूवन्तरेण पच्छण्णनिअ

---

§ सत्यं भवतु तव वचनम् । हन्त महाराजस्या नुमत्या देव्या दमयन्त्या नि युक्ता । त मेव बाहुक मन्तः पुरं नेतुम् । त त्साधयामि ॥

† किं नु खलु महानुभाव आर्यपुत्र एवकेनापि कारणेन बाहुकसञ्ज्ञया रूपा

रूवो हवे। अहवा। केण वि देव्वदुव्विवाएण ईरिसीं अवत्थं पाविदो। (स्मृतिमभिनीय)। किं णु क्खु त माणेदुं पेसिदा चेडिया चिरेदि ॥

(ततः प्रविशति केशिनी)

केशिनी—*देवि अच्छरिअं अच्छरिअं ॥

दमयन्ती—(सभय मिव)। ‡ किं अच्चाहिदं ॥

केशिनी—§ देवि तस्सिं बाहुए मए आणिज्जन्ते जाव अंते उरदुवारं सण्णिहिदं ताव सो इसिणिमीळिदलोअणो खणं ठिदो ॥

दमयन्ती—‡ तदो तदो ॥

केशिनी—*मह आअच्छन्तीए अग्गदो कोवि महन्तो उरओ दिट्ठो ॥

दमयन्ती—(सभयम्)। †तदो तदो ॥

केशिनी—‡तं पेक्खिअ भआउला अहं दूरं ओसरिअ अ

न्तरेण प्रच्छन्न निजरूपोभवेत्। अथवा। केनापि दैवदुर्विपाकेण दृशीमवस्थां प्राप्तः। किं नु खलु त मानेतुं प्रेषिता चेटिका चिरयति ॥

* देवि आश्चर्य माश्चर्यम् ॥

‡ किं मत्याहितम् ॥

§ देवि तस्मिन् बाहुके मया आनीयामाने याव दन्तःपुरद्वारं सन्निहितं तावत्स ईष न्निमीलितलोचनः क्षणं स्थितः ॥

‡ तत स्ततः ।

* मया गच्छन्त्या अग्रतः कोपि महा नुरगो दृष्टः ॥

† तत स्ततः ॥

‡ तं प्रेक्ष्य भयाकुला अहं दूर मपसृत्य मालिन्दस्तम्भान्तरे निलीना ॥

ळिंदक्खंभंतरे णिळीणा ॥

दमयन्तो—(सोद्वेगम्)§तदो सो वाहुकणामा कहिं गदो ॥

केशिनो—‡णिब्भओ अहिमुहं एव्व गदो ॥

दमयन्तो—(सभयाश्चर्यम्) §तदो किं संवुत्तं ॥

केशिनो—†किं अण्णं, दट्ठो एव्व सो ॥

दमयन्तो—§हन्त हद म्हि मन्दभाइणो देव्वेण। अज्जउत्तउ त्तंतोवळंभं वि असहन्तेण ॥

केशिनो—*मा एव्वं ॥

दमयन्ती—†ता किं जादं ॥

केशिनो—§देवि सुणु तेण णाएण सो दट्ठो वि णचलिदो एव्व ॥

दमयन्तो—(साश्चर्यम्)। †तदो तदो ॥

केशिनो—§तइ मह पेक्खन्तोए एव्व पुरो सो राहुमुत्तो विअ चंदो कमेण णिम्मुत्तविकिदरूवो सव्वंगसुन्दरो महाराओ जादो ॥

---

§ तत स्स वाहुकनामा कुत्र गतः ॥

‡ निर्भय अहिमुख मेव गतः ॥

§ ततः किं संवृत्तम् ॥

† किमन्य दृष्ट एव सः ॥

§ हन्त हताऽस्मि मन्दभाग्या देवेन। आर्यपुत्र वृतान्तोपलंभ म प्येमहमानेन ॥

* मैवम् ॥ † त त्किं जातम् ॥

§ देवि शृणु। तेन नागेन स दष्टो ऽपि न चलित एव ॥

‡ तत स्ततः ॥

§ तदा मम प्रेक्षन्त्या एव पुर स्स राहुमुक्त इव चन्द्रः क्रमेण निर्मुक्तविकृत

दमयन्ती—(साश्चर्यमंशयम्)।*को सो महाराओ ॥

केशिनी—†को अण्णो णे सढकुलाणन्दणो अम्हाणं पुण्णरासी सो ॥

दमयन्ती—(साश्चर्यस्तम्भम्)*सहि ण विस्ससिमि तारिसाणं भाअहेआणं अभाअणं अप्पाणं। एव्वं वि हि अणुकूला होन्ति ॥

केशिनी—§किं देवि मए तुह संणिहाणम्मि कदा वि असच्चं आलविदं ॥

दमयन्ती—(सास्रम्)।*ण हि सो सप्पो किं हवे ॥

केशिनी—†सो वि कोवि दिव्वो पुरिसो जादो ॥

दमयन्ती—(साश्चर्यम्)‡सहि को णु एसो हवे ॥

केशिनी—§सो वि मए विण्णादो ॥

दमयन्ती—*कहं विअ ॥

रूपः सर्वांगसुन्दरो महाराजो जातः ॥

* क स्स महाराजः ॥

† को ऽन्यो नैषधकुलानन्दनो ऽस्माकं पुण्यराशिः ।

* सखि नविश्वसिमि । तादृशानां भागधेयाना मभाजन मात्मानम् । एव म पि ह्यनुकूला भवन्ति ॥

§ किं देवि मया तवसन्निधाने कदाप्य सत्य मालपितम् ॥

* सखि स सर्पः किं भवेत् ॥

† सो ऽपि को ऽपि दिव्यः पुरुषो जातः ॥ इत्पुरुषेरोः इति रेफोपर्युत इत् ।

‡ सखि को न्वेष भवेत् ॥

§ सो ऽपि मया विज्ञातः ॥

* कथ मिव ॥

केशिनी—†कक्कोडओ णाम णाअराओ ॥

दमयन्ती—‡कहं तुए विण्णादो ॥

केशिनी—§ताणं संलावो कवंभन्तरणिलीणाए मए सुदो ॥

दमयन्ती—(सानंदाश्चर्यम्)* कहेहि सव्वं ॥

केशिनी—†सो महाराओ तं पुरिसं साअदेण अहिणंदिदुं पवुत्तो । कक्कोडअ णाअराअ पिअसह सागदं कुसलं च तुह त्ति ॥

दमयन्ती—*कहं परिचिदपुव्वो सो अज्जवुत्तेण ॥

केशिनी—† सुणु देवि तदो तेण एव्वं कहिदं । (संस्कृत माश्रित्य) ।

सर्वोपसर्गविनिवारणलब्धवर्णे
लब्धे मया सुहृदि किं कुशलं विमृग्यम् ।
य स्त्वं गतो पि विपदं विपिने सुरर्षि-
शापाहतं दवगतं सह सोदधार्षीः ॥ ११३ ॥
तथा पि कुशलं तावन्मन्ये विकल मेव मे ।

---

† कर्कोटको नाम नागराजः ॥

‡ कथं त्वया विज्ञातः ॥

§ तेषां संलापः स्तम्भान्तर निलीनया मया श्रुतः ॥

* कथय सर्वम् ॥

† स महाराज स्तं पुरुषं स्वागते नाभिनन्दितुं प्रवृत्तः । कर्कोटक नागराज प्रियसख स्वागतं कुशलं च त वेति ॥

* कथं परिचितपूर्व स्स आर्यपुत्रेण ॥

† शृणु देवि तत स्तेनैवं कथितम् ॥

याव त्सभार्य स्सापत्य स्त्वं राज्ये न प्रतिष्ठितः ॥ ११४ ॥

दमयन्तो—‡सच्चं वि तुए कहिदं सुणन्तोए वि अहं एव्वं देव्वं पडिऊलपुव्वं सुणन्तो एदं वुत्तंतं सिविणट्ठिदं विअ पेक्खामि। तदो किं जादं ॥

केशिनो—§सो पुणो एव्वं आह सहे णेसढ मह विसग्गिणा डज्झन्तो कलिहदओ ण किंवि तुमं बाधिदुंपउत्तो। णवा तेण एव्व आवादिदविकिदरूवो तुमं ण केणवि अहिण्णादो त्ति ॥

दमयन्तो—‡हन्त सव्वं एदं कळिहदअस्स दुच्छरिदं। जेण भूदाविट्ठो विअ अज्जउत्तो ण किं वि तदा पडिवज्जइ ह्म। तदो किं उत्तरं दिण्णं अज्जवुत्तेण ॥

केशिनो—सुणु तेण एव्वं भणिदं। (संस्कृतमाश्रित्य) ॥

मा माविष्ट स्स कलिहतको रुद्धमार्गो विषेण
प्लुष्ट स्सम्य क्क्थ मपि गति र्नेति मन्वान एव।
मार्गे लब्ध्वाक्षहृदय महं याव दक्षद्रुशाखा-

---

‡ सत्यं मपि त्वया कथितं शृण्वन्त्या अप्यहं स्वप्नस्थित मिव पश्यामि ततः किं जातम् ॥

§ स पुन रेव माह। सखेनैषध ममविषाग्निना दह्यमानः कलिहतकः न किम पित्वं बाधितुं प्रवृत्तः। न वा तेनैवापादित विकृतरूप स्त्वं न केनापि अभिज्ञात इति ॥ व्यवसायाख्य मवमर्शांगम् ॥

‡ हन्त सर्व मेत त्कलिहतकस्य दुश्चरितम्। येन भूताविष्ट इवार्यपुत्रो न किमपि तदा प्रतिपद्यतेस्म। ततः कि मुत्तरं दत्त मार्यपुत्रेण ॥

* शृणु। तेनैवं भणितम् ॥

पर्णानोकं स्फुट मगणयं स्ताव दे वाविरासीत् ॥ ११५ ॥
तव वपुषि निविष्टं मा मकस्मा द्विषाग्निः
प्रसभ मुपनिरुंधन् भूपते दंदहोति* ।
मम कृत मपराद्धु दंण्डनं साधु तस्मा
न्मयि कुरु करुणां त्वं नैव कोपं न शापम् ॥ ११६ ॥
कथा यत्र त्वदोयानां तत्र नेतः परं विभो ।
चरितुं नक्षम स्सो हं त्वत्सकाशे तु का कथा ॥ ११७ ॥

†एव्वं कहिऊण मए अणुण्णादो गदो त्ति ॥

दमयन्ती—‡तदो तदो ॥

केशिनी—§सो णाअराओ महाराअं उण एव्वं आह। पि असह ण एसो अवसरो तुह पिआसंगमस्स। ता एहि अह्माणं ण अरिं भोअवदिं गमिऊण तत्थ तुह दंसणम्मि किदकूदूहव्वाणं अह्माणं बन्धूणं सन्तोसं करिअ पडिआगमिस्ससि ता एहि त्ति तेण सह अंतादिदो एव्व ॥

दमयन्ती—(सावेगम्)*हन्त विहिणो अतिदारुणो विपाओ॥

---

* दहधातोर्यङ्लुगन्ताल्लटि जपजभदहे त्यादिना अभ्यासस्यनुक् ॥

† एवं कथयित्वा मया नुज्ञातो गत इति ॥

‡ तत स्ततः ॥

§ स नागराजो महाराजं पुनरेव माह। प्रियसख नैषो ऽवसर स्तवप्रियासंजनस्य। तदेह्य स्माकं नगरीं भोगवतीं गत्वा तत्रतव दर्शने कृतकुतूहलानां अस्माकं बन्धूनां सन्तोषं कृत्वा प्रत्यागमिष्यसि। त देहीति तेन महान्तादित एव ॥

* हन्त विधे रतिदारुणो विपाकः ॥

केशिनी—†देवि मा एव्वं सो हि णाअराओ दूरदिट्ठी सिणिद्धो अ, ता किं वि तस्स महाराअस्स मंगलं कादुं एव्व णीदव न्तो । ता सव्वं सुहोदकं भविस्सदि त्ति वीसस मह वअणं ॥

दमयन्ती—‡कस्स क्खु एत्थ पदसद्दो विअ सुणीअदि ॥

केशिनी—(समन्तान्निरूप्य)§वेत्तलट्ठीए विअ सद्दो सुणीअदि । ता कंचुई अय्य बब्भू आअदो त्ति तक्केमि ॥

(ततः प्रविशति कञ्चुकी)

कञ्चुकी—*भर्तृदारिके महाराजो भीम आज्ञापयति, भगवता दमनेन किल तव प्रतिकूलदैवं शमयितुं शान्तिकं कर्मारब्धम् । तत्र त्वया सन्निधातव्य मिति तदादेश मादाया गत स्तच्छिष्यः। तेन हि त्वरतां भवतो तत्र गमनायेति ॥

दमयन्ती—§अलंघणिज्जो गुरुअणादेसो । विसेसेणच ताअस्स गुलुणो भअवदो दमस्स ॥

केशिनी—*ण केवलं आदेसो । अम्हाणं एव्व किं पि भद्दं

---

† देवि नैवम् । सहि नागराजो दूरदृष्टि स्स्निग्धश्च तत्किमपि तस्य महाराजस्य मंगळं कर्तुं मेव नीतवान् । तत्स र्वं शुभोदर्कं भविष्यतीति विश्वसिहि मम वचजनम् ॥ प्ररोचनाख्य मवमर्शांगम् ॥

‡ कस्य खल्व त्र पदशब्द इव श्रूयते ॥

§ वेत्रयष्ट्या इव शब्दश्श्रूयते । तत्कञ्चुकी आर्य बभ्रु रागत इति तर्कयामि ॥

* आदानाख्य मवमर्शांगम् ॥

§ आलङ्घनीयो गुरुजनादेशः । विशेषेण तातस्य गुरोः भगवतो दमनस्य ॥

* न केवल मादेशः । अस्माक मेव किं मपि भद्रं कर्तुं भगवत आदेश इति तर्कयामि ॥

कादुं भअवदो आदेसो त्ति तक्केमि ॥

दमयन्तो—§एव्वं होदु गच्छामो ।

(इति निष्क्रान्तास्सर्वे)

इति श्रीमन्मञ्जुलनैषधे महानाटके षष्ठोंकः ॥

———:*:———

॥ अथसप्तमोंकः ॥

(ततः प्रविशति राजा रथेन सूतश्च)

राजा—अयि नागेन्द्रसारथे ।

ता रम्या मणिभूमय स्सकनका स्सा पन्नगानां पुरो
ते नागेन्द्रफणामणीगणविभा दीपानपेक्षा गृहाः ।
त न्मे सख्यु रहीश्वरस्य भवनं कर्केाटक स्योज्ज्वलं
ते नातिथ्य मुपाहितं न जहति¶ स्वान्तं नितान्तं मम ॥ ११८

सूतः—आयुष्मन् नागराजेन पुन रुपस्तूयमान मा युष्मतो मह दपदानं†जानतो मम मनसि नैत दुवहू भवति । तथाहि ।

नागेन्द्रेण मुनोन्द्रशापमहि मोन्मोतां दशां तादृशीं
दावाग्नौ भवतो ऽनुभाव मथ तज्जोवैकसम्भावनम् ।
उक्ते हन्त निशम्य पन्नगपुरो शुद्धांतमुग्धाङ्गना-
बृन्दै स्तत्क्षणखेदमोदकलना ऽशोतोष्ण मश्रूज्झितम् ॥ ११९

राजा—नन् तदात्वे ऽपि तदर्ण वान्तर्नि मग्नस्य मम समुद्धर

§ एवं भवतु गच्छामः ॥

¶ ओहाक् धातोर्लट्यभ्यस्तत्वा ज्झे रदादेशः ॥

† अपदानम्=वृत्तंकर्म.

णार्थो ऽयं कारुणिकस्य कर्कोटकस्य प्रियसखस्य विपदपदेशः । अ न्यथा ।

कले रतिदुरात्मनः कलुषकृष्णवर्त्मांकृते
रतीव परितापक स्समभव द्यदीयो लवः ।
स यस्य वपुषि स्थितो ज्वलति कालकूटानलो
बिभेति स दवानिला दिति कथं नु विस्रंभणम् ॥ १२० ॥

सूतः—स्थाने खलुमहानुभावानां परस्परश्लाघापरायणत्वम्॥

राजा—सू तान्यपरतया प्रकृतयो कति प्रदेशा अतिक्रान्ता र थेने ति न विज्ञाताः । संप्रति कतमस्मिन् प्रदेशे व्रजामः ॥

सूतः—अतलान्तिक मर्णवमति क्रम्य सम्प्रति भवदोयं भुव न मापन्नाः । तदितः परंकतमं पुनरुद्देश मुद्दिश्य चोदयिष्यामि हयान् ॥

राजा—† सूत चिरविरहदुर्मनायमानां प्रियतमां द्रष्टुकामो ऽस्मि । त त्कुंडिनपुरं प्रति चोदयतु भवान् ॥

सूतः—आयुष्मन् नागराजेन चारमुखाच्छ्रुतं भगवतो दम न स्याश्रमं प्रति गता सेति ॥

राजा—तेन हि तदे वाश्रम मुद्दिश्य झडिति चोदयाश्वान् ॥

सूतः—तथा । (इतिचोदयति)

राजा—(स्मृति मभिनोय) हन्त प्रियादर्शनोत्कण्ठेन मनसा प्रियसख स्योदेशंन्यस्मार्षम् ॥

---

‡ Atlantic Ocean.

† विबोधाख्यं निर्वहणाङ्गम् ॥

सूतः—कथ मिव ॥

राजा—‡ अजित्वा पुष्करकं तव प्रियासमागमो न नः प्रीति मावहतीति । तन्निषधान् प्रत्येवचोदय ॥

सूतः—विदर्भदेश मतोऽयै व ह्यनेना ध्वना निषधा गन्तव्याः

राजा—अस्तु विदर्भा नपरेण कान्तारमार्गेण चोदय ॥

सूतः—तथा (इति चोदयति) ॥

राजा—(पुरोवलोक्य)अये मह दिदं कान्तारम् । अत हि ॥

क्वचि दविरलस्निग्धश्यामा मिळद्भि रनोकहैः
क्वचि दुभयतो जातै र्मध्ये निबद्धपदा इव ।
क्वचि दुपनमच्छाखायुग्मावलंबिनमल्लता
व्यतिकरकृता नेकप्रेंखोळिका¶वनभूमयः ॥ १२१ ॥
गर्जन्ति क्वापि सिंहाः क्वचि दपि शरभा स्सारवा स्संचरन्ति
क्वापि व्याघ्रा युवानः कृतकटुनिनदा वाव्रज†त्यात्ततृष्णाः ।
भल्लूका घोरहिकाःक्वचिदपिचवृकारेषमाणाःकृताश्चि
त्फूत्कुर्वन्तिप्रचंडंमुहुरुदितरुषः क्वचिदन्दशूकाः ॥ १२२ ॥
नून मेतेन निषधविदर्भभूमध्यकान्तारेण भवितव्यम् ॥

सूतः—आयुष्म न्निह दूरेण दक्षिणतोमुनोना माश्रमपदा नीव दृश्यन्ते ॥

---

‡ ग्रथनाख्यं निर्वहणाङ्गम् ॥

¶ प्रेङ्खोलिका=डोला=(आन्ध्रे) उय्येल ॥

† व्रजधातो र्यङुलुगन्ता ल्लट्यभ्यस्तत्वाज्झे रदादेशः । अकित्त्वा दव्यासस्य दीर्घः ॥

राजा—(निरूप्य)। सत्य माश्रम†पदा न्येव। तथा हि।

तिर्यक्छाखाग्रयुग्मग्रथितदृढतया वल्कला स्तापसानां
वाताधूताः स्फुरन्ति स्फुट मिह वटव* स्सर्वतः पर्यटन्ति।
धूमा श्चाभ्रं लिहा‡ग्रा धू॒वमिह हविषामाज्यगन्धा न्वमन्तो†
दृश्यन्ते मध्यगौराः क्रमघनमलिनाः प्रान्तभागे तरूणाम् ॥

नेपथ्ये—भोभो आश्रमप्रविष्टोयं मृगो न हन्तव्योनहन्तव्यः ॥

राजा—(आकर्ण्य)। केन चि न्मृगयुणा‡ऽनुद्रुतो§मृगः कश्चिदा श्रमं प्रविष्टः। तद्धप्रतिषेधक स्तापसानां करुणाशीलाना मयं शब्दः ॥

पुनर्नेपथ्ये—

अहिंसा भवतां धर्मो नास्माकं क्षत्रिया वयम्।
वध्यावध्यविभागो ऽत्र को ऽयं वनमृगेषु नः ॥ १२४ ॥

---

† आश्रमः। आश्राम्यन्त्यत्र, अनेनवा। श्रमुतपसि खेदेच। घञ्। नोदात्तो पदेशस्येति वृद्धिर्न। यद्वा आसमन्ता च्छ्रमो ऽत्र। स्वधर्मसाधन क्लेशात्। आश्रमः=मुनीनां स्थानम्। आश्रमो ऽस्त्री मुनिस्थाने ब्रह्मचर्यादिके मठे इति यादवः ॥

* वटवः=ब्रह्मचारिणः ॥

‡ अभ्रंलेढीति अभ्रंलिहः। वहाभ्रेलिह इतिखश्। अजन्तत्वान्मुम्। खशो ङित्वा न्न गुणः ॥

† टुवमु उद्गिरणे। वमते श्शतरि रूपम् ॥

‡ मृगं (अनुसृत्य हन्तुं) यातीति मृगयुः। उणादिः कुप्रत्ययान्तः ॥

§ अनुसृत्य द्रुतो गतः। द्रुधातोःक्तः ॥

राजा—आः केनापि दुर्विनीतेन तापसाना मनुशासन मुल्लं घ्य भाषित मिदम् ।(पुरोवलोक्य)।अये कश्चि दयं रथी दूरा त्प्रधा वन्त माश्रमाभिमुखं मृगं हन्तुं कृतबाणसन्धानो ऽनुधावति । मृगः पुन रधुनापि नबाणपाते वर्तते ॥

नेपथ्ये—अरे क्षत्रबन्धो† ॥

अपूर्वं ते क्षात्रं किमिद मतिभूमिं गत महो
मुनीना मादेशो ननु मनसि किं चि न्न भवति ।
तदास्तां हन्तव्याः किल वनमृगा स्ते यदि परं
नशक्त स्त्वं हन्तुं मनुजपशु रेवासि नियतम् ॥ १२५ ॥

राजा—(निरूप्य)। गुरुजनवचनातिलंघनेन क्रुद्धोनिष्क्रामत्य श्रमा त्कोपि क्षत्रियकुमार इव । (निपुणं निरूप्य)। अये ।

रथिन मभियाति कोयं पदाति रेकः कुमारको धन्वी ।
लोलशिखंडकचूड§ स्सिंहशिशु र्द्विरद मिव मत्तम् ॥ १२६ ॥

आ श्रिशु रयं निर्भयः । रथिक श्चायं दुर्विनीतः । त दत्रैव रथं स्थापय । अनयो स्संवादं शृणुम स्तावत् ॥

पुनर्नेपथ्ये—किमात्थ रे कुमोर किमात्थ अपूर्वं ते क्षात्रमिति। अरे दुर्ललित† नकेवलं मृगं हन्तुं शक्तोऽहं । किंतु पणबन्धं‡चे त्करो

† क्षत्रबन्धुः । क्षत्रं बन्धुर्यस्यसः । निन्दितक्षात्रिय इत्यर्थः ॥

§ लोलौचञ्चलौ शिखण्डकचूडौ काकपक्षशिखे यस्यसः । शिखण्डकचूडयोर्लौल्यं बाल्यसूचकमिति कविसमयः ॥

† दुर्ललितः=अविनीतः ॥

‡ यतारम्भेयस्यजयस्तस्ये दमिति निश्चितो भनादिः । अस्यैवग्रह इस्य

षि तेनैव त्वां दासीकर्तुमपि ॥

राजा—कुमारकः किं मुत्तरं दास्यति ॥

पुनर्नेपथ्ये—अरे नोक्तवा नसि वाक्यशेषम्। न चे दासीभ विष्या मीति ॥

राजा—इतः परं किमपि रथी वक्तुकामः ॥

पुनर्नेपथ्ये—पणबंध स्यायं न्याय एव। परं त्वसंभ वीति न त दुक्तम्।

राजा—अयं रथी शरं मुञ्चन् किं मप्याह ॥

पुनर्नेपथ्ये—न न्वय महम् ॥

मुंचामि शर मेतस्मिन् यदि शक्नोषि वार्यताम् ॥ १२६॥ ॥

राजा—हन्त विमुक्त एव शरो जालमेन ॥

पुनर्नेपथ्ये—

अय मद्य मया च्छिन्न श्शर श्शेते निशामय‡ ॥ १२७ ॥

राजा—§हन्त पराजित ए वायं तदिदानों किं वक्ष्यति ॥

पुनर्नेपथ्ये—कुमार अयं तव दासीभूतोस्मि। नियोजय कर्तव्यम् ॥

राजा—कुमारः किं वक्ष्यति ॥

नेपथ्ये—अस्मद्गुरवे भगवते भवन्त मर्पयिष्यामि। ततः प

पि व्यवहारः। आन्ध्रे पंदेमु ॥ अत्रदासीभाव एव पणबन्धः ॥

‡ निशामय=पश्य। श्रुति दृष्ट्यो र्निशामनम् इति नानार्थरत्नमाला ॥

§ उपगूहनाख्यं निर्वहणाङ्गम् ॥

रं कर्तव्येषु स एव भगवान् प्रमाणम्* ॥

राजा—हन्त उभौ निष्क्रान्तौ। सूत एनं कुमारं दृष्टवतो म म यथा ऽपत्ये तथा मनो लग्नम्। आश्रमपदञ्चेदं कस्यापि महर्षेः† भविष्यति। येन कुमारकः स्तं भगवा निति निर्दिष्टवान्। अनति क्रमणीयानि चमहतामाराधनानि। त देनं विशिष्य परिज्ञायो *पग म्य‡तदनुज्ञातएव नगरं गन्तु मिच्छामि। त दिहैव स्थापय रथम्। आश्रमोपघातोऽमाभूत्§। याव दहं पुन रागमिष्यामितावद दार्द्रपृष्ठाः* क्रियन्तांवाजिनः ॥

सूतः—धृताः प्रग्रहाः†। अवतर त्वायुष्मान् ॥

राजा—(अवतरणं नाटयति)

सूतः—(रथेन सह निष्क्रान्तः)

राजा—(परिक्रामितनाटितकेन)

नेपथ्ये—*वच्छे सच्चं वच्छो केण वि रहिणा अहिउत्तो त्ति सुदं। तं मे मणं कंपेदि ॥

---

* प्रमीयते निश्चीयते ऽनेन कर्तव्य मिति प्रमाणम्—निश्चायकः ॥

† महां श्चासौ ऋषिश्च महर्षिः। अलौकिक तत्त्वसाक्षात्कारसमर्थः ॥

* परिज्ञाय—ज्ञात्वा ॥

‡ उपगम्य—प्राप्य ॥

§ उपघातः—पीडा ॥

* आर्द्रपृष्ठा इत्यनेन अश्वानां श्रमापनोद स्सूचितः ॥

† प्रग्रहः—हयरश्मिः। तुलासूत्रे ऽश्वादिरश्मौ प्रग्राहप्रग्रहा वुभौ इतिनाना र्थ रत्नमाला ॥

* वत्से सत्यं वत्सः के नापि रथिना अभियुक्त इति श्रुतं तन्मे मनः कम्पयति ॥

राजा— अये दक्षिणतः स्त्रियो रालाप इव श्रूयते । त ह्मै का कुमारी । अन्या चैकवेणीधरा काचि त्पुरन्ध्री । (पुनःपरिक्रम्य सम्यङ्निरूप्य) §ह न्तैषा देवी दमयन्ती मम प्रियतमा । अनयाच वत्स इत्याह्वयमानया कुमार्या वत्सया इंद्रसेनया भवितव्यम् । कथ मन्यथा मम पश्यत एवापत्यस्नेहो जात एतस्याम् ॥

(ततः प्रविशति दमयन्ती इंद्रसेनाच)

इन्द्रसेना—†सच्चं एव्व केण वि रहिणा अहिउत्तो त्ति मु णिकुमारो वामरच्छो कहेदि ॥

दमयन्ती—‡कहिं सो वामरच्छो ॥

इन्द्रसेना—§ एवं कहिऊण पुणो तत्थ गदो ताएं कलहं पे क्खामि त्ति ॥

दमयन्ती—*ता तुरिदं गदुअ तादस्स णिवेदेहि ॥

इंद्रसेना—*तह (इति निष्क्रान्ता) ॥

राजा—तात भीमो प्यत्रै वागत इति कथितं भवति । त द्यं भगवा न्दमन इति तर्कयामि । य दाज्ञया तात स्येहागमनं संभा व्यते । याव दियं देवी वत्सस्य युद्ध मितिश्रवणा च्छोता परितप्यते

---

§ मन्ध्याख्यं निर्वहणाङ्गम् ॥

† सत्य मेव केनापि रथिना अभियुक्त इति मुनिकुमारो वामरथ्यः कथयति ॥

‡ कुत्र स वामरथ्यः ॥

§ एवं कथयित्वा पुन स्तत्र गत स्तेषां कलहं प्रेक्ष्यामीति ॥

* तत्त्वरितं गत्वा तातस्य निवेदय ॥

* तथा ॥

ताव देत वृत्तान्तं स्वय मेव कथयामि । (इति परिक्रम्योपसृत्य) ॥

वर्धसे देवि मा भैषी र्वत्सेन जयशालिना ।
फणो जांगलिकेऽ नेव रथो येन वशोकृतः ॥ १२८ ॥

(इत्युपसर्पति)

दमयन्ती—(दृष्ट्वा सविस्मयम्)§§अये कहं अज्जउत्तो । (इति स्तं भंनाटयति) ॥

राजा—

क्रूरेण विधिना येन प्रस ह्यैवं वियोजिता ।
अकस्माद्दर्शिता स्यत्र ते नैवाश्चर्यकर्मणा ॥ १२९ ॥

दमयन्ती—§हन्त पुरिसाओ जह क्रूराणि कम्माणि कुणन्ति तह समएसु अणुऊलाणि वअणाणि वि दातुं समत्था एव्व । स व्वत्थ अबलाओ अबलाओ एव्व । (इत्यश्रूणि मुंचति) ॥

राजा—देवि मामैवम् ।

कलुषितमनसो मम प्रवृत्तिः
कलिहतकेन† तदा तथाविधा भूत् ।

---

* जाङ्गलिकः=विषवैद्यः ।

§§ अये कथ मार्यपुत्रः ॥ आनन्दाख्यं निर्वहणाङ्गम् ॥

§ हन्त पुरुषा यथा क्रूराणि कर्माणि कुर्वन्ति तथा समयेषु अनुकूलानि वच नान्यपि दातुं समर्थाएव । सर्वत्र अबला अबलाएव ॥ आबलाः=स्त्रियः । अबलाः=बलराहिताः ॥

† कलिहतकः=हतकः कलिः कलिहतकः । स्यादशूरस्तु हतकः । कुत्सिता नि कुत्सनैरिति समासः ॥

नियत मितरथा कथं नृशंसो
प्यहह वने विजने जहामि कान्ताम् ॥ १३० ॥

दमयन्ती—*किं कलिणा मह अपुण्णं एव्व तत्थ कारणं ॥

राजा—†सत्य मस्मि कलिना जडीकृतः । शपामि तव पादा
भ्याम् । (इति पादयोः पतति) ॥

दमयन्ती—(उत्थाप्य) §मो एव्वं । अज्जउत्त अणुइदं एदं ॥

राजा—(पुरोवलोक्य) तातपाद*सन्निधिं प्रति प्रेषिता इन्द्रसे
ना प्रत्यागच्छति ॥

(प्रविश्य) इंद्रसेना—‡अंब अच्छरिअं । वच्छेण किल रही
दासीकिदो । (राजानं दृष्ट्वा स्वगतं) अए को णु क्खु एसो ।

राजा—(इंद्रसेनां दृष्ट्वा) एह्येहि वत्से परिष्वजस्व माम् ॥

इंद्रसेना—§अंब को एसो ॥

दमयन्ती—*अह्माणं पुण्णरासी ॥

इन्द्रसेना—§अये तादो । (इति परिष्वजति) ॥

राजा—(सबाष्पम्)देवि एव मावयो र्विधिर्विपाकेन वनंगत

---

* किं कलिना म मापुण्य मेव तत्र कारणम् ॥

† प्रसादख्यं निर्वहणांगम् ॥

§ मैवम् । आर्यपुत्रानुचित मेतत् ॥

* तातपादः=पूज्यपादः । गौरवोक्तिः ॥

‡ अम्ब आश्चर्यम् । वत्सेन किल रथी वशीकृतः । अये कोनु खल्वेषः ॥

§ अम्ब क एषः ॥

* अस्माकं पुण्यराशिः ॥

§ अये तातः ॥

यो वत्समेयं वत्स इंद्रसेनश्च कुत्र प्रस्थितौ† ॥

दमयन्तो—*अय्यवुत्तस्स जूदोसाहं णिसमिअ णिअदं अणत्थो हविस्सदित्ति तक्किअ वहणेएण सारहिणा रहेण दुवे वि मादामहपुरं पवेसिदा। एसा वच्छा तत्थ एव्व ट्ठिदा ॥

राजा—वत्सः पुनः कुत्र प्रस्थितः ॥

दमयन्तो—‡तादेण उवणअणादि सक्कारं कादुं भअवंतस्स दमणस्स जेव्व सण्णिहिं पेसिदो। तदो पहुदि कुळोइदा विज्जा सिक्खंतो तत्थ इव्व चिट्ठइ ॥

राजा—अथ कथं भवती इ हागता ॥

दमयन्तो—§अय्यवुत्तेण परिच्चत्ता वेवंती वणादो वणंतरं मंदं गमिऊण मादामहस्स चेदिराअस्स णअरं उवगमिअ तत्थ कइणिवि दिणाणि ट्ठिदा तादस्स णअरं पविट्ठा। तत्थ एव्व ट्ठिदा दाणिं उण अह्माणं पडिऊलदेव्वं पडिहंदुं भअवन्तेण दमणेण करिज्जमाणे संतिए कम्मणि पहाणाहुदिसमए संणिहादव्वंति तस्स एव्व भअवंतस्स णिदेसेण पुव्वेज्जु एव्व वच्छाए एदाए सह

† प्रस्थितौ=प्रयातौ ॥

* आर्यपुत्रस्य द्यूतोत्साहं निशम्य नियतमनर्थो भविष्यतीति तर्कयित्वा वा र्णेयेन सारथिना रथेन द्वा वपि मातामहपुरं प्रवेशितौ। एषा वत्सा तत्रै व स्थिता ॥

‡ ताते नोपनयनादि संस्कारं कर्तुं भगवतो दमनस्यैव सन्निधिं प्रेषितः। ततः प्रभृति कुलोचिता विद्याशिक्षमाण स्तत्रैव तिष्ठति ॥

§ आर्यपुत्रेण परित्यक्ता वेपन्ती वनाद्वनान्तरं मन्दं गत्वा मातामहस्य चेदि राजस्य नगर मुपगम्य तत्र कान्यापिदिनानि स्थिता तातस्य नगरं प्रविष्टा

इह आअद म्हि ॥

राजा—अथ कथं तात भीमस्या त्रागमनम् ॥

दमयन्ती—‡बाहुअव्वबदेसेण गूढस्स अय्यउत्तस्स आअमणं उदुवण्णस्स आणअणं अन्तरेण ण सक्कं ति दमअन्तीसअंवरो पउज्जदि त्ति पअडीकरिअ आणीदो सो राएसी ॥

राजा—महतो राजर्षेः प्रतारणे†न महा नपराध आपतितः ॥

दमयन्ती—*मा एव्वं। अदो एव्व हि दमअंतीसअंवरो त्ति रूवअं भअवन्तेण दमणेण णिवद्धं सुत्तधारहत्थे दिण्णं च ॥

राजा—ह न्तेदानीं छिन्न स्संशयतन्तुः†। त त्किं तस्य रूपकस्य प्रयोगं† दृष्टवान् राजर्षिः ॥

दमयन्ती—§भअवंतस्स आणत्तीए इह जेव्व तादेण आणी

तत्रैवस्थि तेदानीं पुन रस्माकं प्रतिकूल दैवं प्रतिहन्तुं भगवता दमनेन क्रियमाणे शान्तिके कर्माणि प्रधानाहुति समये सन्निधातव्य मिति त स्यैव भगवतो निदेशेन पूर्वेद्युरेव वत्स यैतया स हे हागता ऽस्मि ॥

‡ बाहुकव्यपदेशेन गूढ स्यार्यपुत्र स्यागमनं ऋतुपर्ण स्यानयन मन्तरेण नशक्यमिति दमयन्ती स्वयंवरः प्रयुज्यत इति प्रकटीकृत्य आनीत स्सराजर्षिः ॥

† प्रतारणम्=भर्त्सनम्। आन्ध्रे- बेदारिंचुट.

* मैवम्। अतएवहि दमयन्ती स्वयंवरइति रूपकं भगवता दमनेन निबद्धं सूत्रधारहस्ते दत्तंच ॥

† संशय एवतन्तु स्संशयतन्तुः। तन्तुरिवानुवर्तमानस्संशय इदानीं निवृत्त इत्यर्थः ॥

† प्रयोगः=अभिनयः।

§ भगवत आज्ञ प्त्येहैव ताते नानीतो भगवता मुनिना मधुपर्केण विधिना स

दो भअवंतेण मुणिणा महुवक्केण विहिणा सक्किदो अज्ज तस्स मंणि हिम्मि एव्व चिट्ठिइ ॥

राजा—तर्हि तातोऽपि तत्रैव वास्त इति मन्ये ॥

दमयन्तो—§अह इं ॥

राजा—(पुरोवलोक्य। साश्चर्यं)। अये कथ मित एव प्रिय सखः कर्कोटकः ॥

(ततः प्रविशति कर्कोटकः)

कर्कोटकः—सखे वर्धसे सापत्यप्रियासमागमलाभेन ॥

राजा—सर्वथा भवतः प्रियसुहृदो लाभेन ॥

कर्कोटकः—तेनहि महोपकारो दमनो भगवा न त्रैवाश्रमे उप विष्टो मन्मुखा त्वदागमनं श्रुत्वा भवन्त मेव प्रतीक्षते। एहि गच्छावः ॥

राजा—ऋतुपर्णो राजर्षि स्तातभोमश्च तत्रैव स्थिता विति श्रुतम् ॥

कर्कोटकः—न केवलं तौ। कुमार इंद्रसेनः पुष्करकश्च ॥

राजा—कथं पुष्करकः ॥

कर्कोटकः—नकेवल मागतः कुमरेण जितो दासीकृतः ॥

त्कृतोऽद्य तस्य सन्निधा वेव तिष्ठति ॥ मधुपर्कः—दधिसंयुक्तमधु। तद्दानं षोडशोपचारेषुषष्ठोपचारः ॥ मधुपर्कोद्विविधः। समांसो ऽमांसश्चेति। वाल्मीकिर्वासिष्ठस्य समांसमधुपर्कं जनकस्यामांसपधुर्कश्च ददौ इति कथोत्तर रामचरिते ऽनुसंधेयं ॥

§ अथाकिम् ॥

राजा— (सहर्षं) †हन्त वत्सेन जित स्स पुष्करकः। (आश्चर्यं)। मया कर्तव्यं वत्से नैव कृतम्॥

कर्कोटकः—सर्व मिदं भगवतः प्रभावः॥

अशिव मपहन्ति सद्यो
घटयति मंगल मनुग्रहो महताम्।
रवि रेकपदे तिमिरं
निहन्ति पद्मं विकासयति॥ १३१॥

(इति सर्वे परिक्रामन्ति)॥

राजा—(पुरोवलोक्य) अये पुर एव भगवां स्तातभोमेन ऋतुपर्णेन चोपास्यमानः कि मपि वत्स मिन्द्रसेन मनुयुंजान‡ स्तिष्ठति तत्सकाशे च पुष्करको ऽस्मद्दायादः॥

(ततः प्रविश त्यासनस्थो दमनः ऋतुपर्णो भोमइंद्रसेनः पुष्करकश्च)॥

दमनः—वत्स इंद्रसेन वद किं संवृत्तं॥

इन्द्रसेनः—§भगव न्नाश्रम प्रविष्टो मृगो नहंतव्य इति मुनिभिरयं प्रतिषिद्धः। मयाच निवारितः। अरे त्व मेतं मृगं हन्तुं न शक्नोषीति। अयं पुन स्तत्र पणबन्ध मकार्षीत्। यदि हनिष्यामि तदा मम दासो भविष्यसीति। नचे दह मेव तथा भविष्या मीतिच

† समयाख्यं निर्वहणाङ्गम्॥

‡ अनुयुंजानः=पृच्छन्॥

§ निर्णयाख्यं निर्वहणाङ्गम्॥

कृच्छ्रा दुक्तवान् ॥

दमनः—राजन् पुष्करक सत्य मिदं ॥

पुष्करकः—भगवन् सत्य मेव ॥

दमनः—ततः किं संवृत्तम् ॥

इंद्रसेनः—एतेन शरो मुक्तः । तस्मि न्नेव क्षणे मया च्छि
न्नः ॥

दमनः—तर्हि जित एव ।

भीमः—येन न्यायेन नैषधो ऽनेन जित स्तेनैवन्यायेन वत्से
नायं जितः ॥

ऋतुपर्णः—युक्त मुक्तं भवद्भिः ॥

दमनः—तत स्ततः ॥

इन्द्रसेनः—दासो ऽस्मि मां यथेष्टं नियोजये त्येष आह ।
त्वां भगवते समर्पयामि । तत स्स एव प्रमाण मित्य ह मुक्तवान् ॥

दमनः—राजन् पुष्करक त्व मनेन वत्सेन मह्यं दत्तो सि ॥

पुष्करकः—भगवन् कृतार्थो स्मि ॥

दमनः—(पुरोवलोक्य) अये का वेता वागच्छतः ॥

पुष्करकः—(निरूप्य स्वगतं) । अये स नलो मम दायादः
यस्य राज्यं द्यूतच्छलेन† मयापहृतं । (प्रकाशं) । भगव न्नयं वीरसे
नात्मजो नलो मम दायादः* ॥

---

† छलं=व्याजः ।

* दायादः=दायं आददा(ति=स्वीकरो)तीति दायादः ।

दमनः—(स्मृतिमभिनोय)। ‡अयमपरः कर्कोटकः ॥

राजा—(उपसृत्य)। *भगवन्नैषधो नलो ऽभिवादयते ॥

दमनः—स्वस्ति भवते सह कुटुम्बाय। स्वागतं नैषधकर्कोटकौ ॥

उभौ—भगवतो दर्शनेन ॥

दमनः—उपविश्यतां ॥

(कर्कोटक नैषधा वुपविशतः) ॥

दमनः—वत्स इन्द्रसेन तव पितरं नल मभिवादयस्व ॥

इन्द्रसेनः—तथा (इत्युत्थाय प्रणमति) ॥

राजा—(सबाष्पं) एह्येहि वत्स परिष्वजस्व मां ॥

इन्द्रसेनः—(सबाष्पं परिष्वजति) ॥

राजा—(भीम मवलोक्य)। अये तात भीमः(इतिप्रणमति)।

भीमः—वत्स अव्यसनो भूयाः ॥

राजा—(ऋतुपर्णमवलोक्य)। अये अयोध्याधिपतिः ऋतुपर्णो राजा। ये नाह मस्मि चिरं परिरक्षितः ॥

ऋतुपर्णः—सखे नैषध किमिदं मया त्वं परिरक्षित इति कथ मिदं ॥

दमनः—वाहुकसंज्ञया तव गेहे स्थितो रूपान्तर मापन्नो नैषध एव ॥

---

‡ कृत्याख्यं निर्वहणाङ्गं ॥

* परिभाषाख्यं निर्वहणाङ्गम् ॥

ऋतुपर्णः—(साश्चर्यं) । कथं रूपान्तरं प्राप्तम् ॥

राजा—कर्कोटकस्य नागराजस्य प्रभावात् ॥

दमनः—राजन् सर्वथा नागराजस्य प्रियसखस्य प्रसादा† मां दुरवस्था मुत्तीर्णा† ऽसि ॥

कर्कोटकः—भगवता ऽनुष्ठितस्य शान्तिक§स्य कर्मणः प्रभावा त्सर्वे वय मुपकर्तारः ॥

दमनः—(विहस्य) । अप्रत्यक्षं कर्म प्रत्यक्षस्य कर्मणो निमित्तोक्रियते ॥

राजा—

लब्धं फलं मह दि हास्य फणीश्वरस्य
हेतुं क्रियां भगवतश्च ननु प्रतीमः ।
अंगांगिभाव मनयो र्न वयं प्रवक्तुं
शक्ता स्सचे दिह परं विदतु र्भवन्तौ ॥ १३२ ॥

दमनः—राजन् नैषधअयं वत्से नेन्द्रसेनेन जितो मह्य तश्च । मया चेदानीं तुभ्यं दत्तः ॥

राजा—अयं मम दायादः पुष्करकः ॥

---

† उत्तीर्णः=पारंप्राप्तो ऽसि ॥

§ शान्तिकम्=मंगळार्थं क्रियमाणं कर्म ॥

१३२ श्लो ॥ महत्फलं (=ममविपन्नाशरूपं फलं) लब्धम् । भगवतो नस्य फणीश्वरस्यच क्रियां अस्य हेतुं (=कारणं) प्रतीमोननु (जानीमोहि)। अनयो (=क्रिययोः)अंगांगिभावं प्रवक्तुं न वयं शक्ताः । सः(=अंगांगिभावो वर्तते) भवन्तौ(=युवां) परं(=एव) विदतुः ॥

पुष्करकः—(सलज्जम्) । आर्य वन्दे ॥

राजा—वत्स सुखीभूयाः ॥

पुष्करकः—आर्यत्वां शरणं गतो ऽस्मि । क्षंतव्यं मया कृत म
ाधजातं† (इति नतमुख स्तिष्ठति) ॥

ऋतुपर्णः—सखे नैषध मयापि बाहुकसंज्ञया गूढं त्वा मजान
ा यद्य दनुचित मुदीरतं तत्सर्वं क्षंतव्यं ॥

राजा—आपन्नरक्षकस्य भवतः कि मनुचितं नाम ॥

दमनः—नैषध

येन द्यूते निर्जितं राज्यमेष
भ्रातृव्य§ स्ते निर्जितः पुत्रकेण ।
दासीभूतः प्रा गित स्तस्य य त्स्वं
त द्भावत्कं* त त्प्रजानां पति स्त्वं ॥ १३३ ॥

स्मरन्तिहि मुनयः ॥

भार्या पुत्रश्च दासश्च त्रय एवाथवा स्मृताः ।
य त्तै रुपार्जितं किं चि द्यस्यैते तस्य तद्धनं ॥ १३४ ॥

। एनं दासं गृहाण । दास्या द्वा विमोचय ।य थेच्छसि
कुरु ॥

राजा—भगवन्

दास्या दयं पुष्करको विमुक्तो

अपराधजातं=अपराधसमूहः । बृन्दं जातं चक्रवालमिति वैजयन्ती ॥
भ्रातृव्यः=भ्रातृपुत्रः ।
भावत्कम्=भवदीयम् । † पूर्वभावाख्यं निर्वहणाङ्गम् ॥

यथासुखं तिष्ठतु को विचारः ।
ग्रामा नयं पंच ममैव राज्ये
यथाभिलाषं सुचिरं भुनक्तु ॥ १३५ ॥

पुष्करकः—आर्य कृतार्थोऽस्मि ॥

दमनः—राजन् नैषध‡ किं ते भूयः प्रिय मुपहरामि* ॥

§नष्टः कले र्दुर्विषहो निरोधो
देवी च लब्धा विजयो च वत्सः ।
वत्सा च दृष्टा विजितं च राज्यं
किं मोप्सितं कार्य मितः परं नः ॥ १३६ ॥

तथा पोद मस्तु । (भरतवाक्यम्)

†स्फुरतु सुमनसां प्रसन्नवाणी
मधुरमरंदझरो निरोतिवेगा ।
श्रवणपुटयुगै र्निपीयमाना
जनयतु मंगलसंपदं जनानाम् ॥ १३७ ॥

(इति निष्क्रन्ता स्सर्वे)

इति नानातन्त्रस्वतन्त्रस्यश्रीमन्महामहोपाध्यायाविरुदाङ्क
स्य श्रीमत्परवस्तुपदाङ्कितस्य वेंकटरंगनाथाचा
र्य स्यार्यवरगुरोः कृतिषु मञ्जुलनै
षधं नामांतिरुचिरं नाटकं
समाप्ति मगात् ॥

——:*:——

‡ काव्यसंहाराख्यं निर्वहणाङ्गं ॥ * उपहराभि=उपायनीकरोमि
§ भूषणाख्यं निर्वहणाङ्गं ॥ † प्रशस्तिर्नामनिर्वहणांगम् ॥

